श्रीः

श्रीपद्मावतीसमेत श्रीनिवासपरब्रह्मणे नमः

कृष्णयजुर्वेदीय—श्वेताश्वतरोपनिषत्

[ओम्—पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते इति, भद्रं कर्णेभिरिति, सह नाववत्विति च शान्तिः।] हरिः ओम्॥ ब्रह्मवादिनो वदन्ति—

किं कारणं ब्रह्म कुतः स्म जाताः जीवाम केन क्व च सं(सु)प्रतिष्ठा।
अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्॥ १॥

श्रीः

श्रीमते रामानुजाय नमः

[येनोपनिषदां भाष्यं रामानुजमतानुगम्।
रम्यं कृतं प्रपद्ये तं रङ्गरामानुजं मुनिम्॥]

श्रीरङ्गरामानुजमुनिवरविरचितं प्रकाशिकाभिधानं भाष्यम्।

अतसीगुच्छसच्छायमञ्चितोरस्थलं श्रिया।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम्॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि।
श्वेताश्वतरमन्त्राणां विवृतिं करवाण्यहम्॥

स्वेतरसमस्तचेतनाचेतनविलक्षणपरमात्मस्वरूपनिर्दिधारयिषया इयमुपनिषत् आरभ्यते। विद्यास्तुत्यर्थमाख्यायिकामाह *ब्रह्मवादिनो वदन्तीति*। ब्रह्मवदनशीला मुनयो वक्ष्यमाणप्रकारेण वदन्ति स्मेत्यर्थः। किमिति। हे ब्रह्मविदः! जगतः कारणं ब्रह्म किंदेवतारूपम्? कस्माद्ब्रह्मणोऽस्माकं जन्म स्थितिश्च संप्रतिष्ठाशब्दितो लयश्च। केन वा

ब्रह्मणा अधिष्ठिताः तत्परतन्त्रास्सन्तः, अनसि ऊनगोसंघवत्, जिह्मासितेषु

श्रीः

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः ।

श्वेताश्वतरोपनिषद्भाष्यपरिष्कारः

य: श्वेताश्वतरोदितश्चिदचितोरीशः परं योगिनाम्
मुक्तश्चाप्यथ जगन्मयोऽप्यणुचिदानन्त्यावहः संश्रयः ।
देवं कालहिरण्यगर्भगिरिशाद्याधारमेतं परं
शेषाकारसुपर्णशैलनिलयं श्रीशं गिरिशं श्रये ॥

१. *विदितं खलु भृगुर्वारुणिः वरुणं पितरमुपसृत्य, यत इमानि भूतानि जायन्ते, येन जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति, तद् ब्रह्मेत्यधीत्य, तादृशं ब्रह्मैव किमिति निर्धारयितुमनाः तपस्तप्त्वा क्रमेण अन्नप्राणमनोविज्ञानव्यतिरिक्तमानन्दं ब्रह्म निश्चिकायेति* (तै.भृ.) । तथैव रीत्या बहवो ब्रह्मवादिनः सर्वविधकारणत्वेन घुष्यमाणं ब्रह्म किम्भूतमिति निर्धारयितुं संभूय विचिन्त्य कालस्वभावकर्मजीवादीनामतथात्वं तदन्यस्य कस्यचित् तथात्वस्वीकारे कस्याप्यवचस्य विरहश्चाऽऽलक्ष्य तादृशं ब्रह्म स्वीचक्रुः, यादृशस्य ग्रहणं न दुष्यति । तदेव तपःप्रभावदेवप्रसादभावितपरमार्थज्ञानः श्वेताश्वतरः ब्रह्मविन्महर्षिसंघजुष्टं ब्रह्म परममुत्तमाश्रमिभ्यः प्रोवाच । तदिह प्रतिपाद्यते ब्रह्मवादिन इत्यादिना । वदन्ति स्मेति भूतकालादरणं भूतस्यैवोपजीवनार्हत्वात् । श्रुतौ लट्प्रयोगो वादस्यास्य सार्वकालिकत्वव्यक्तये । किं कारणं ब्रह्मेति । जगत्कारणं तावत् ब्रह्मेति सर्वे प्रतियन्ति । तच्च जन्मस्थितिलयरूपसर्वकारणम् । न केवलमेतावत् । स्थितेरिव प्रवृत्तेरपि कारणम् । तद् ब्रह्म किम्भूतम् ?

दुःखरूपेषु जन्मसु विशिष्टामवस्थितिमनुसृत्य वर्तामहे । सुप्रतिष्ठेति पाठेऽप्ययमेवार्थः । (१)

ननु कारण ब्रह्म सिद्धवत्कृत्य किंदेवतारूपमिति प्रश्न एवानुपपन्न । तस्यैवानभ्युपगन्तव्यत्वात् । लोके हि कालज्ञा कालमेव सर्वकारणमाचक्षते । लोकायतिकास्तु स्वभावमेव हेतुमाचक्षते । मीमासकास्तु नियतिलक्षण कर्मैव हेतु मन्यन्ते । अपरे अहेतुकत्वलक्षण

कि निर्गुण सगुण वा ? सगुणमपि कीदृशगुणम् ? तथा गुणातिरिक्तद्रव्यात्मकविशेषविधुर तद्विशिष्ट वा ? विशिष्टमपि कियद्विशिष्टम् ? वैशिष्ट्यमपि किंरूपम् ? तथा एवम्भूतमिद कि ब्रह्मरुद्राद्यन्तर्भूतम् उत सर्वजीवविलक्षण ब्रह्मरुद्रादिहेतुभूत किञ्चित् दैवतमित्येव ब्रह्मवादिनो मीमासन्ते इति भाव । वर्तामहे इत्यस्य प्रवर्तामहे इत्यथ उत्तरार्धं प्रवृत्तिकारणत्वमपि ब्रह्मणो वक्तु प्रवृत्तमिति ध्येयम् । अथवा जीवामेत्यैहिक सुखदु खमिश्र जीवनमुक्तम्, सुखेतरेषु वर्तामह इत्यनेन स्वर्गनरकयोर्व्यवस्थया वृत्तिरुच्यते । तत्र वृतुधात्वर्थस्य व्यवस्थया सहाभेदविवक्षया क्रियाविशेषणतया व्यवस्थायाश्चिति कर्मत्वोपपादने क्लेशमनुचिन्त्य, अनुसृत्येति ल्यबन्तस्याध्याहार कृत । अत्र अनेककिंशब्दप्रयोग , कार्यभेदेन कारणभेदोऽपि किं स्यादिति शङ्काव्यञ्जनाय , एककार्यकारणत्वेन सभाव्यमानस्याप्यन्यकार्यकारणत्वासभवे कथ ब्रह्मत्वमित्याक्षेपाभिव्यक्तये च।

कालज्ञा ज्योतिर्विद । स्वभावमेव हेतुमिति । न्यायकुसुमाञ्जलौ सर्वार्थसिद्धौ चैतद्विस्तर । यदृच्छया भवतीत्यस्य, अकस्माद् भवति, न कस्मादपि भवतीत्यर्थात् तत्र कस्यचित् हेतुतया निर्देशा-

काल स्वभावो नियतिर्यदृच्छा भूतानि योनि पुरुष इति चिन्त्यम्।
संयोग एषा न त्वात्मभावादात्माऽप्यनीश सुखदु खहेतो ॥ २ ॥

यादृच्छिकत्वम् । अपरे पञ्च भूतानि । प्रकृति केचित् । पुरुष केचिदाचक्षते । तेषामन्यतम पक्षोऽस्तु । किं ब्रह्मकारणवादाभ्युपगमेनेत्याशङ्क्याह काल इति। कालादीनि कारणमित्येतन्न युक्तिसहम् । दोषाणा बहूना स्फुरणात् । चिन्त्यम् न निश्चेतु शक्यम् , अचेतनाना चेतनस्य वा प्रत्येक हेतुत्वासंभवादित्यर्थ । ननु एषा संयोगो हेतुर्भवितुमर्हति । न चैषा संयोजकाभाव शङ्कितव्य । तेषां मध्ये आत्मनश्चेतनस्य संयोजकस्य सद्भावेन संयोगसंभवादित्याशङ्क्य आत्मन स्वातन्त्र्ये सुखभोक्तृत्वमेव स्यात्, दु खभोक्तृत्वम् । अत सुखदु खानुभवितुर्जीवस्यापि न नियन्तृत्व संभवतीत्याह **संयोग: —हेतो।** । उक्तोऽर्थ । न त्वात्मभावादित्यत्र तुशब्द एवार्थ । आत्मसद्भावात् संयोग संभवतीत्येतन्नैवेत्यर्थ । ब्रह्मणोऽप्यपरिणामिन उपादानत्वञ्च न संभवतीति भाव । (२)

योगात् पूर्वोत्तरभङ्गीं विहाय, ('यदृच्छा हेतुम्' इत्यनिर्दिश्य) अहेतुकत्वलक्षण यादृच्छिकत्वमिति भङ्ग्यन्तरादरणम् । पुरुष केचिदिति । कर्मणा योगेन च पूर्वपूर्वकल्पे सिद्धिमधिगतवतामुत्तरकल्पे भूम्यन्तरिक्षस्वर्गनरकादिसर्वनिर्माणनैपुणी संभाव्यत इति कपिलहिरण्यगर्भादिषु परदेवताबुद्धि बिभ्रतामभिमान । अत्र योनिशब्द कारणपर्याय कालादौ प्रत्येकमभिसंबध्यत इति परेषा व्याख्यागति । इह तु पूर्वमन्त्रादेव कारणमित्यनुषङ्गात् योनिपद प्रसिद्धप्रकृतिपर स्वीकृतम्।

आत्मभावादित्यस्यार्थद्वयम् । जीवात्मसद्भावादिति, परमात्ममात्रसद्भावादिति च । जीवात्मन कारणत्वमिव परमात्मन कारण-

त्वमपि तेन निरस्त भवति। कथ हि तस्य जन्मलयादिसर्वकारणत्वम्, अपरिणामितयोपादानत्वायोगादिति । तदाह ब्रह्मणोऽप्यपरिणामिन इति। एवञ्च पूर्वाध पुरुषशब्दोऽप्युभयपर इति वा, तत्र प्रकारवाचिना इतिशब्देन परमात्मग्रहणमभिमतमिति वा ग्राह्यम् । तथा च कालादीना पृथगपृथग्वा कारणत्व दु साधमित्युक्त भवति ।

तत्र कालस्तावत् नोपादानम् । इदानीं जायते, तदानीं नश्यतीति जन्मनाशावच्छेदकतया प्रतीतावपि क्व च सप्रतिष्ठित्युक्तलयाधारत्वादिरूपोपादान नायोगात् । कार्याभिन्न हि कारणमुपादानम् । न च कालस्य घटपटादिना कार्येण सहैक्यप्रतीतिरानुभविकी । वर्तमानत्वादिरूपस्य कालस्य सर्वत्र विशेषणतयैव स्फुरणात् । अखण्ड काल कश्चित् कारणमिति चेत्—तर्हि तत सर्वदा सर्वकार्योत्पत्ति प्रसज्यते ।

अथ स्वभाव । स किं कार्यस्य स्वभाव उत कारणस्य? नाद्य, कार्यं हि स्वपूर्वकालवर्ति यदपेक्षते, तत् कारणम् । तत्र स्वमेव स्वस्य कारण न भवति आत्माश्रयादिति स्थिते, का कथा स्वगतो भाव स्वस्य कारणमिति । अथ कारणस्य स्वभाव इति, तर्हि कारणमन्यत् निरूप्यम् । अथ सत्कार्यवादात् कार्यकारणैक्यात् स्वात्मको भाव पदार्थ कारणमित्यर्थ इति चेत्—स एव क । घटस्य मृदादि पटस्य तन्त्वादिरिति चेत्–तस्याचेतनस्य कथ स्वतन्त्र्येण कारणत्वम्। जीवात्म केन, सुखेतरेषु वर्तामहे इत्युक्त चेतननिरूपित कारणत्वमचेतने कथ घटते?

अथ नियति । नियति = नियम अवश्यम्भाव । अवश्यम्भावात् द्रव्यस्य भवती युक्तौ उत्पत्तिरेवोत्पत्तो कारणमुक्ता स्यात् । अथ यतोऽवश्य भवति, सा नियति —सा पक्षान्तरभूता का नाम? पुण्य पापात्मक कर्मेति लोकप्रसिद्धमेवेति चेत्–क्षणभङ्गुर तत् कालान्तर

भाविने फलाय कथमलमिति वक्तव्यम्। व्यापारद्वारेति चेत्-किं कर्मणोऽपि कश्चिद् व्यापारः? स कुत्रत्यः? न कर्मणि तस्य नष्टत्वात्। न भूतेषु तेषामपि नश्वरत्वात्। भूतानां कारणत्वपक्षस्य स्वीकार प्रसङ्गात्। न कर्तरि पुरुषकारणत्वपक्षपरिग्रहापत्तेः। न चाचेतना धर्मभूता नियतिः धर्मिभूतचेतनाचेतनसर्वोत्पत्तिलयस्थानं च स्वतन्त्रञ्च भवितुमर्हति।

न च यदृच्छापक्षः। तथा हि सति कारणं किमपि नेत्येवोक्तं भवति। तदेतत् अन्नपानाद्यर्थिनः कृषिकूपनिर्माणादिसार्वलौकिक-प्रवृत्तिव्याहतमनुन्मत्तः को नु वक्तुमर्हति?

भूतानीति, योनिरिति च भौतिकपदार्थविषये युज्यते, न पुरुषादिविषये। न च भूतान्यचेतनानि स्वतन्त्राणि कार्यकराणि दृष्टानि। तानि च सुखदुःखेषु पुरुषाणां व्यवस्थया कथं कारणानि भवेयुः? सर्वेषामेषां केनचित् प्रकारेण कारणत्वेऽपि ईशनव्यापार-लवलेशस्यापि तत्राभावेन न पुष्कलं कारणत्वम्। तदिदम् आत्माऽप्यनीशः इति अपिना दर्शितम्। आत्मा तु पुरुषो यद्यपि कश्चिदीष्टे—अथापि अनीशः सुखदुःखहेतोः। न खलु स्वदुःखार्थं किञ्चित् स्वयमेव चेतनः सृजेत्। ननु कर्मयोगसिद्धाः केचित् कल्पारम्भे कल्पितजनयः सर्वेषां सर्वविधं जनयन्तीति चेत्—त एव स्वात्मने तु स्वहेतुं कथं कल्पयेयुः। तेष्वेकोऽन्यस्य, स एतस्येत्येवं कल्पयन्तीति चेत्-तर्हि परस्परकलहेन कल्पप्रारम्भ एव प्रध्वंसितः स्यात्। किञ्च ते किं जनित्वा सर्वं कल्पयन्ति अथाजनित्वा। अन्त्यः पक्षो नोत्थातुमर्हति। आद्ये तु जनिर्नाम देहेन्द्रियबुद्धिवेदनासंघातसंपत्तिः। सा च भूतपञ्चकाद्यधीना। तत् सर्वमिदं तदुत्पत्तेः प्रागेव यदि, ते कथं सर्वकारणम्? इति रीत्या अत्र चिन्तनप्रकारो द्रष्टव्यः।

ते ध्यानयोगानुगता अपश्यन् देवात्मशक्ति स्वगुणैर्निगूढाम् ।
य. कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक ॥ ३ ॥

ते इति । एव ध्यानयोगयुक्ता मुनय , 'अपहतपाप्मा दिव्यो देव एको नारायण ' इति श्रुतिप्रसिद्धदेवशब्दितनारायणात्मिका कार्योपयोग्यपृथक्सिद्धविशेषणत्वेन शक्तिशब्दिता सत्त्वरजस्तमोलक्षण **स्वगुणोपेता** ब्रह्मणो जगत्कारणत्वनिर्वाहिका प्रकृतिं दृष्टवन्त इत्यर्थ । तत पर तच्छरीरक सर्वविधकारण सकलकारणाधिष्ठितार समाभ्यधिक-शून्यं परमात्मानमपि दृष्टवन्त इत्याह **य: कारणानीति** । उक्तोऽर्थ ।

मूले योनिरिति प्रकृतिरुच्यते । भूतकारणवादिन चार्वाकादय । तत्कारणभूतमात्राऽहङ्कारमहत्पूर्वतया प्रकृते कारणत्व सांख्यसंमतम् ।२

उक्तकालाद्यतिरिक्तस्य तत्प्रेरकस्य सर्वविदात्तु कस्यचिदेव कारणत्व निश्चाय तस्याप्यपरिणामिन उपादानत्वायोगात् उपादानान्तरस्वीकारे च तस्य सर्वविधकारणत्वभङ्गप्रसङ्गात् कि कार्यमिति विमृश्य यादृशपदार्थस्वीकारे उपादानत्वमपि रक्षित भवेत्, अवस्थावदचिदचिद्गतपरिणामविरहश्च पालितो भवेत्—तादृशपदार्थस्वीकारमध्यवसितवन्त इत्युच्यते ते ध्यानेत्यादिना । देवात्मशक्तिमिति । आत्मा द्विविध जीवात्मा देवात्मा चेति । तत्र जीवात्मन• ब्रह्मरुद्रकपिलादे कारणत्व न कल्पते । देवात्मा तु कारणम् । देवात्मा नाम य सर्वदा देव एव भवति, स । तद् भाष्यते, अपहतपाप्मा दिव्यो देव एको नारायण इति । दिवु क्रिडायामिति निष्पन्नेन देवशब्देन, लोकवस्तु लीलाकैवल्यमिति च दर्शित भवति । शक्तिमिति अपृथक्सिद्धविशेषणरूपतया पदार्थस्वीकारप्रदर्शनात् उपादानत्वासभवादिसर्वदोषनिस्तार । शक्तिरित्यस्य

कार्योपधायकापृथक्सिद्धविशेषणमित्यर्थः । उपयोगित्वं नाम कारणतावच्छेदकत्वम् । तेन ब्रह्मोपादानम्; उपादानतावच्छेदिका प्रकृतिरित्युक्तं भवति । प्रकृतेर्ब्रह्मापृथक्सिद्धत्वमजानतां व्यवहारस्तावत्, प्रपञ्चं प्रति प्रकृतिः कारणमिति । जानतां तु स व्यवहार औपचारिकः, परमतस्यांशतः स्वीकारमूलको वा । वस्तुस्थितिमनुसृत्य मुख्यस्तु व्यवहारः प्रपञ्चं प्रति प्रकृतिविशिष्टं ब्रह्मोपादानमिति । न चोपादानोपादेययोरभेदहानिः प्रपञ्चस्यापि ब्रह्मापृथक्सिद्धतया तद्विशिष्टब्रह्मण एव कार्यतया तदक्षतेः । प्रकृतिरियं द्रव्यभूताऽपि उक्तविधापृथक्सिद्धिमत्तया शक्तिर्भवितुमर्हति । एवं शक्तिभूताया अस्याः द्रव्यत्वं स्वगुणैर्निरूढामित्यनेन दर्शितम् । स्वपदेन परमात्मादौ सत्त्वरजस्तमोरूपप्राकृतगुणासंभवः सूच्यते । प्रकृतेर्गुणानाञ्च भेदप्रदर्शनेन, गुणसमुदायः प्रकृतिरिति सांख्यमतञ्च व्युदस्यते । नन्वेवमचेतनस्य कस्यचिदुपादानतावच्छेदकत्वे सर्वोपादानत्वं कथं ब्रह्मण इति शङ्कापरिहारपूर्वकं शक्तिशक्तिमतोरनयोः संबन्धोऽपि विशदीक्रियते उत्तरार्धे । यानि कारणानि, प्राक् प्रस्तुतानि, स्वभावो नियतिर्भूतानीति, तानि सर्वाणि प्राकृतान्येव । प्रकृत्यनन्तर्गतश्च यदि कश्चित् स्वभावः, स पुरुषेऽन्तर्भविष्यति । यथैषां कारणानां देवापृथक्सिद्धत्वम्, तथा कालस्यापि द्रव्यस्यानाद्यन्तस्य क्षणलवकाष्ठामुहूर्तादिपरिणामशालिनः तदपृथक्सिद्धत्वमेव । एवं देवमनुष्यतिर्यक्स्थावरात्मना जायमानस्य जीवात्मनोऽपि । एवं स्वापृथक्सिद्धप्रकृतिपुरुषकालस्यास्य ब्रह्मणः न दाहजनकौष्ण्यरूपशक्तिसंपन्नस्याग्नेरिवाधिष्ठातृत्ववैकल्यम्, येन स्वान्यहानिरन्यापेक्षा च प्रसजेत् । तदुच्यते अधितिष्ठत्येक इति । एकश्चास्य सर्वेशितृत्वादुपादानत्वमिव निमित्तत्वमपि निरूढमिति एक एव सर्वविधकारणत्वसंपन्न इति पूर्वपृष्टसर्वार्थपुष्कलमिदं परं ब्रह्मेति । अत्रोत्तरार्धे तमित्याध्याहारेण अपश्यन्नित्यन्तस्यानुषङ्गो वा;

तमेकनेमिं त्रिवृतं षोडशान्तं शतार्धारं विंशतिप्रत्यराभिः ।
अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥४॥

चिन्तावनारसौकर्याय तं चक्रत्वेन रूपयति **तमेकनेमिमिति** । परमात्मानं प्रकृत्याख्यैकनेमियुक्तं सत्त्वरजस्तमोगुणैः त्रिप्रकारतया त्रिवृतं षोडशसङ्ख्यायुक्तान्तशब्दितविकारोपेतं वाचकभूताकारादिपञ्चाशद्वर्णलक्षणारोपेतं द्वादशमासपञ्चर्त्वयनद्वयसंवत्सरात्मकविंशतिप्रत्यरयुक्तमित्यर्थः । **प्रत्यराभिरिति** लिङ्गव्यत्ययश्छान्दसः । अरा हि नाभिनेमिमध्यवर्तिकाष्ठविशेषाः । *प्रत्यराश्च तद्दाढर्यार्थनिहिताः तन्मध्यवर्ति* काष्ठविशेषाः । **अष्टकैरिति** । अणिमाद्यैश्वर्याष्टकमेकम् , प्राच्यादिदिगष्टकमपरम् , दिक्पालाष्टकमेकम् , ‘भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा’ इति गीतोक्तं प्रकृत्यष्टकम् । (‘अष्टौ प्रकृतयः’ इत्युक्तप्रकृत्यष्टकात्मकमन्यत् ,) ‘ब्रह्म प्रजापतिर्देवा गन्धर्वा यक्षराक्षसाः । पितरश्च पिशाचाश्च’ इति देवाष्टकमेकम् , (‘अष्टौ वसवः’ इत्युक्तवस्वष्टकम् ,) अपहतपाप्मत्वादिब्राह्मगुणाष्टकम् , ‘दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहा’ इति *आत्मगुणाष्टकं वा । एवमेभिः [यथार्हं ?]* षड्भिरष्टकैरुपेतम् । **विश्वरूपो**

योऽधितिष्ठति, तस्य देवात्मशक्तिमपश्यन्नित्यन्वयो वाऽस्तु । यद्वा उत्तरार्धमिदमुत्तरश्लोकेनान्वितमिति, मा भूत् तत्र तमित्यध्याहारः, किं तु अपश्यन्नित्यन्तानुषङ्गमात्रम् । पूर्वत्र तु पक्षे उत्तरश्लोकस्य तदुत्तरश्लोकेन एकवाक्यतया तं देवात्मानं प्रभृति पञ्चपर्वामधीम इत्यन्वयोऽपि स्यात् । तेन पूर्वोक्तापृथक्सिद्धिनिबन्धनः आत्मप्रकृत्योः सामानाधिकरण्येन निर्देशोऽपि दर्शितो भवति ।

पञ्चस्रोतोम्बुं पञ्चयोन्युग्रवक्रां पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलाम् ।
पञ्चावर्तां पञ्चदुःखौघवेगां पञ्चाशद्भेदां पञ्चपर्वामधीमः ॥ ५ ॥

विराट्पुरुषः । स एव (एको ?) मुख्य पाशः । स्वाभिन्नजगदैश्वर्यहेतुतया बन्धकपाशवत् विराट्पुरुष ब्रह्मचक्रस्य पाशरूप इत्यर्थः । त्रिमार्गभेद द्विनिमित्तैकमोहं देवयानपितृयाणक्षुद्रजन्तुभवनलक्षणमार्गत्रययुक्तम्, तत्र च पितृयाणक्षुद्रजन्तुभवनलक्षणमार्गद्वयहेतुभूतदेहात्मैक्यमोहमित्यर्थः । अपश्यन्निति पूर्वेण संबन्धः । (४)

एवं चक्रत्वेन रूपयित्वा तच्छक्तित्वेन निर्दिष्टां प्रकृतिं वैराग्याय नदीत्वेन रूपयति पञ्चस्रोतः इति । स्रोतोरूपेणाविच्छिन्नतया प्रवर्तमानानि तमोक्षराव्यक्तमहदहङ्काररूपाणि अम्बुस्थानीयानि यस्याः सा तथोक्ता । महाभूतोपादानतया योनिभूतानि पञ्च तन्मात्राण्येव उग्रवक्त्राणि प्रवाहमुखरूपाणि यस्याः सा पञ्चयोन्युग्रवक्त्रा । प्राणापानादयः पञ्च ऊर्मिस्थानीया यस्याः सा पञ्चप्राणोर्मिः । बुद्धेर्ज्ञानस्यादिभूतानि पञ्च ज्ञानेन्द्रियाणि मूलं यस्याः सा पञ्चबुद्ध्यादिमूला । पञ्चकर्मेन्द्रियाणि आवर्तस्थानीयानि यस्याः सा पञ्चावर्ता । पञ्च महाभूतानि अत्यन्तप्रतिकूलतया प्रवर्तमानानि [1]ओघ वेगस्थानीयानि यस्याः सा पञ्चदुःखौघवेगा । अकारादिपञ्चाशद्वर्णलक्षणनामभेदयुक्ताम्, 'तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः' इति पुराणप्रसिद्धपञ्च[विध]सुप्तिलक्षणपर्वपञ्चकयुक्ताम् ब्रह्मात्मिका प्रकृतिं तदधिष्ठिता रञ्च परमात्मानम् अधीमः स्मराम इति अपश्यन्निति पूर्वेणान्वयः । (५)

1. ओघशब्दितेति पाठे ओघशब्दिततमोक्षरादिपञ्चकीयवेगेति स्यात्

सर्वाजीवे सर्वसंस्थे बृहन्ते तस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे ।
पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ॥ ६ ॥

एवं, "किं कारणं ब्रह्म कुतः स्म जाताः" इति चिन्तायां, 'देवात्मशक्तिं', 'यः कारणानि निखिलानि तानि' इत्यनेन च देवशब्दित-नारायण एव सर्वकारणम्, अपरिणामिनोऽपि तस्य कारणत्व-निर्वाहिका प्रकृतिरिति निस्तारो दर्शितः। अधिष्ठिताः केन सुखेतरेषु (रो ऽत्तरेषु) इति चिन्तायां निस्तारं दर्शयति सर्वाजीवे इति । सर्वान् आजीवयतीति सर्वाजीवम् (वे) । अनेन, जीवाम केनेत्यस्योत्तर-मुक्तं भवति । सर्वेषां संस्था समाप्तिः=प्रलयो यस्मिन् तत् सर्वसंस्थम् । अनेन च, 'क्व च संप्रतिष्ठा' इत्यस्योत्तरमुक्तं भवति । बृहन्ते बृहती-त्यर्थः । अतश्च निरतिशयबृहत्त्वादेव सर्वसंस्थत्वादिकं युज्यत इति भावः । तादृशे ब्रह्मरूपे चक्रे, हन्ति=गच्छति अनेकजन्मसहस्रसंचरण-शील इति हंसः जीवः परवशतया, 'भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया' इत्युक्तरीत्या ब्रह्मचक्रेण भ्र(भ्रा)म्यमाणोऽयं भ्रमतीत्यर्थः । एतज्ज्ञा-नस्य फलमाह पृथगात्मानमिति । उक्तरीत्या भ्रमयितृत्वेन परमात्मा-नम्, तेन भ्राम्यमाणं तच्छरीरभूतञ्च स्वात्मानं मत्वा तज्ज्ञानप्रीतेन

---

६ 'यन्त्रारूढानि मायया (गी 18 61) इत्यत्र तात्पर्यचन्द्रि-कायां ब्रह्मचक्रपदं प्रकृतिपरं वर्णितम् ।

प्रेरितारमिति । ईर क्षेपे । आधृषादित्वात् णिचो विभाषा । प्रेरयितारमित्यर्थः । ननु कथं पृथङ्मत्वेति पृथक्त्वानुसंधानविधिः, 'योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमिति, न स वेदेति

उद्गीत(थ)मेतत् परमं तु ब्रह्म तस्मिंस्त्रयं सु(सु)प्रतिष्ठाक्षरञ्च ।
अत्रान्तरं वेदविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः ॥ ७॥

परमात्मना [प्रमत्तेन] जुष्टः प्रीत्या विषयीकृतस्सन् मुक्तिं प्राप्नोतीत्यर्थः । तत्श्चामृतत्वफलप्राप्तिहेतुभूतज्ञानविषयस्य प्रेर्यप्रेरकलक्षणजीवपरभेदस्य परमार्थत्वमुक्तं भवति । अपरमार्थज्ञानस्य मोक्षहेतुत्वासंभवादिति द्रष्टव्यम् । (६)

उद्गीतमिति । एतत् चक्ररूपतया प्राङ्निर्दिष्टमेव, 'नारायण परं ब्रह्म', 'स्वे महिम्नि प्रतिष्ठित,' 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति' इत्यादिवेदान्तवाक्येषु परब्रह्मत्वेन स्वप्रतिष्ठत्वेनाक्षरत्वेन चोद्गीतम् उच्चैर्गीतम् । उद्गीथमिति पाठेऽपि स एवार्थः । तस्मिन् स्वप्रतिष्ठा-

---

तन्निषेधादिति चेत्—न, तत्र 'आत्मेत्येवोपासीत' इति आत्मत्वोपासनविधानात् राजभृत्यन्यायेन भिन्नत्वेन पृथक्सिद्धत्वानुसंधानं निषिद्ध्यते । इह तु आत्मत्वानुसंधानोपयोगी शरीरत्वात्मत्वरूपपार्थक्यं वस्तुभेदो वस्त्वैक्यभ्रमव्यावृत्तये मन्तव्यतयोच्यते इत्यविरोधात् । आत्मत्वानुसंधानञ्चेदम्, 'अहं ब्रह्मास्मि' इति एकशब्दाभिलापानुगुणमिति च तत्रैव बृहदारण्यके व्यक्तम् ।

'नन्वेतावता साक्षात्प्रभृत्यधिष्ठाता ब्रह्मचक्रे पुरुषाणां भ्रमयिता प्रेरयिता देवात्मा कश्चित् सिद्धः । तावता ब्रह्म कारणमिति कथं सिद्ध्यति' इत्यत्र, 'अयमेव ब्रह्म अस्य ब्रह्मशब्देन कारणसमर्पकेण व्यवहारकाले उक्तसर्वविशेषणविशिष्टं तत् प्रतिपत्तव्यम् । निशिष्टाकारेण ह्यस्य स्थूलावस्थापनहेतुत्वरूपं बृहत्त्वापादकत्वम्' इत्युच्यते उद्गीतमिति ।

स्वप्रतिष्ठाक्षरञ्चेत्यनेन त्रयस्य ब्रहणायोगात् तस्य पूर्वान्वय-

क्षररूपे ब्रह्मणि प्रकृतिपुरुषकालरूपं त्रयमाश्रितमित्यर्थः । **अत्रान्तरमिति** । तत्पराः ब्रह्मपराः ब्रह्मेऽक्षरे अत्रैतद्देशे(श) प्रकृतिपुरुषकालानां विवेके (क) तेषां परमात्मनश्चापृथक्सिद्धतया आधाराधेयभावलक्षणम् **अन्तरम्** अन्तरशब्दितभेदं अतिशयितं भेदं विदित्वा प्रकृतिबन्धनिर्मुक्तास्सन्तः परमं साम्यं प्राप्य भिन्नतया (अभिन्नतया) अदर्शनलक्षणलयं गता इत्यर्थः । (७)

विवक्षया 'तस्मिन् त्रयम्' इत्यस्य मध्यनिविष्टस्य वाक्यात् पृथक्कारः । तस्य च, त्रयं तद्विशिष्टमित्यर्थः । विशिष्टस्य तु निरुक्तौ देवात्मैव परमं ब्रह्म च भवति स्वप्रतिष्ठाक्षरश्च भवतीत्यर्थः । अक्षरं द्विविधम्, 'अक्षरात् परतः परः' इत्युक्तं प्रकृतिरूपम्, 'एतद्वै तदक्षरं गार्गी'ति तदितरपरब्रह्मरूपञ्च । तत्र द्वितीयस्य ग्रहणाय स्वप्रतिष्ठेति विशेषणनिर्देशः । अमृताक्षरं हर इति वक्ष्यमाणजीवरूपाक्षरव्यावृत्तये वा विशेषणनिर्देशः । तेन ब्रह्मणः परमत्वं तदुपरिवस्त्वन्तरसद्भाववाद-निरासपूर्वं स्थापितं भवति । तस्मिन्नित्यादेः उपर्यन्वयसंभवे तु— तस्मिन् यत् त्रयं प्रकृतिपुरुषकालरूपम्, यच्च तदाधारभूतं *स्वप्रतिष्ठाक्षरम्, (तदुभयं विदित्वा) अत्र मिथोऽन्तरं विदित्वेति* रीत्या वर्णनीयम् । तदपेक्षया ब्रह्मनिष्ठं पूर्वोक्तं त्रयम्, ब्रह्मरूपस्वप्रतिष्ठाक्षरञ्चेति सर्वमिदं उद्गीतमेतत् परमं ब्रह्म भवति—ब्रह्मशब्दार्थविशेष्यविशेषणभावेन निविष्टं भवतीत्यर्थवर्णनं ज्याय । कश्चित्तु, 'परमं ब्रह्मैतत् उद्गीतं प्रमाणेन । किं तत् प्रमाणम्? उच्यते । तस्मिन् ब्रह्मणि विषये त्रयं—वेदत्रयम्, स्वप्रतिष्ठाक्षरं मूलान्तरनिरपेक्षप्रणवाक्षरञ्चास्ति प्रमाणतया' इति व्याख्याति । स्वप्रतिष्ठाक्षर-मिति कर्मकृतपरिणामरहितनित्यमुक्तजीवनित्यविभूत्यन्यतरपरं वा । तत्रापि 'क्षरश्चाक्षर एव च', 'यदक्षरे परमे प्रजा' इति तत्प्रसिद्धेः ।

संयुक्तमेतत् क्षरमक्षरञ्च व्यक्ताव्यक्तं भरते विश्वमीशः ।
अनीशश्चात्मा बध्यते भोक्तृभावात् ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥

नतु प्रकृतिसंबन्धे जीवपरयोरविशिष्टे सति जीवस्य कुतो बन्ध? परस्य कुतो नेत्यत्राह संयुक्तमिति । ईशः परमात्मा व्यक्तरूपं क्षरमचिद्वर्गम् अव्यक्तमक्षरं चिद्वर्गं च परस्परसंयुक्तं बिभर्ति; न तु बध्यते । अनीशो जीवस्तु बध्यते कर्मफलभोक्तृत्वाभिसन्धिलक्षणभावसत्त्वात् । परमात्मनस्तु (परमात्मा तु ?) 'न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा' इत्युक्तरीत्या तस्य कर्मफलस्पृहाभावेन कर्मलेपाभावात्, स्वसंयुक्ततया प्रकृतिभरणेऽपि अपहतपाप्मत्वात् प्रकृतिसंबन्धप्रतिभटः तत्प्रतिभटज्ञाने विषयश्चेति निर्गलितार्थः । (८)

तथाच कालादित्रयं यत् तदक्षरमपि भवति तन्निष्ठमित्यर्थः । सुप्रतिष्ठाक्षरमित्यपि पाठोऽस्ति ॥ ७ ॥

संयुक्तमिति । क्षरमक्षरञ्च यदा संयुक्तं भवति, तदा एवम्भूतं देहं तेन ध्रियते । तत्र देहस्यापि आत्मनोऽपि तद्धार्यत्वमस्तीति भावः । अत्रात्मत्वोपयोगि धारकत्वमुक्तम् । ईश इत्युक्तं नियन्तृत्वमप्युपरि विवरिष्यते, 'क्षरात्मानावीशते देव एक' इति । ननु ईशः स्वतन्त्रो न बध्यते, अक्षरं तु परतन्त्रत्वाद् बध्यते चेत्, ईशो निष्करुणः प्रसज्यते; नेत्याह भोक्तृभावादिति । अहं भोक्तेत्याकारकभावत्वादित्यर्थः । तादात्विकक्षुद्रभोगप्रावण्येन कर्मणो निषिद्धस्य, पाश्चात्यप्रकृष्टभोगलिप्सया काम्यस्य च तेनानुष्ठिततया कर्मवेष्टितत्वादिति भावः । एवमवश्यानुभोक्तव्यशुभाशुभकर्मनिगडबद्धोऽपि यत् मुच्यतेऽननुभुज्यैव तत्फलजातम्, तत्र देवस्य कारुण्यमेव कारणमित्युच्यते, ज्ञात्वा देवमित्यादिना । सर्वमिदं विनियत उत्तरमन्त्रे ॥८॥

ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृभोगार्थयुक्ता ।
अनन्तश्चात्मा विश्वरूपो ह्य(ष्य ?)कर्ता त्रयं यदा विन्दते ब्रह्ममेतत् ॥

परस्परवैलक्षण्यमेव प्रपञ्चयति ज्ञाज्ञाविति । पूर्वनिर्दिष्टयोर्मध्ये एकः सर्वज्ञः अत एव ईशश्च । अपरस्तु अज्ञोऽनीशश्च । उत्पत्तिराहित्य तु द्वयोरपि समानम् । ईशनीशाविति दीर्घाभावः छान्दसः । भोक्तृजीवस्य भोगरूपप्रयोजनयुक्ता उत्पत्तिरहिता काचनान्या प्रकृतिरित्यर्थः । एवं तृतीय(त्रितय ?)मुत्पत्तिराहित्येन समानमपि परस्परं विलक्षणमित्यर्थः । ननु प्रकृतेः जीवभोगोपकरणत्ववत् परमात्मनोऽपि भोगार्थत्वं कुतो न भवेत् ? प्रत्युत एकैकशरीरजीवभोगार्थत्वे सकलशरीरकपरमात्मभोगार्थत्वमपर्जनीयमेवेति, अत्राह अनन्तश्चेति । विश्वशरीरकस्यापि परमात्मनः, 'नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमुच्यते' इत्युक्तरीत्या सत्यकामत्वाद्यनन्तगुणाश्रयस्य निरपेक्षस्य जीववत् कर्मफलाभिसन्धिपूर्वककर्तृत्वाभावात् न तद्भोगार्थत्वं प्रकृतेरिति भावः । एतादृशवैलक्षण्यज्ञानस्य फलमाह— त्रयमिति । एतत् त्रयं यदा विन्दते परस्परवैलक्षण्येन दर्शनसमाना—

ज्ञाज्ञाविति । अनात्मपरत्वात् जीवं प्रतिकूलमनुकूलञ्च प्रपञ्चं भावयन् रागद्वेषोपप्लुतः कर्मपरवशः स्वयमनीशो बन्धं प्रतिपन्नुम् । अभिशतमस्तु देवो न तथा । भोक्तृभोगार्थयुक्तेति । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इत्युक्तलक्षणं भोक्तारमेव भोजयेदजा न पुनः शरीरान्मुक्तम् । जहाति ह्येनां भुक्तभोगामजोऽन्यः । नतरां निर्मलं परमात्मानमिति । अनन्तश्चेति । न केवलं ह्य, अपहतपाप्मत्वसत्यसङ्कल्पत्वाद्यनन्तगुणश्च, त्रिविधपरिच्छेदरहितश्च, विष्णुरादनन्तपदरूढ्यर्थभूतश्चेति । दर्शनसमानाकारख्यानेनेति । ननु देवस्य

क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।

कारध्यानेन विषयीकरोति, तदा ब्रह्म भवति—मुक्तो भवतीत्यर्थः । एवमेव व्यासार्यैः, "चमसवदविशेषात्" इत्यत्र व्याख्यातम् । ब्रह्ममिति छान्दसं रूपम् । (९)

संयुक्तमिति मन्त्रनिर्दिष्टक्षराक्षरशब्दार्थं विवृण्वन् परस्परवैलक्षण्यज्ञानमात्रेण मुक्तौ, मनननिदिध्यासनवैयर्थ्यमिति शङ्कां च शमयति क्षरं प्रधानमित्यादिना । 'प्रधानं प्रकृतिः स्त्रियाम्' इति प्रधानशब्दिता प्रकृतिः क्षरमित्युच्यते । भोग्यमात्मनो भोगार्थं हरतीति हरो जीवः ।

तादृशध्यानविषयीकारो मुक्तये स्यात्, न तु त्रयस्येति चेन्न—चेतनाचेतनविलक्षणत्वेन परमात्मोपासने तयोरपि ध्यानविषयीकारो भवतीति तात्पर्यात् । प्रसिद्धश्चोपासनत्रैविध्यमपि । इन्द्रप्राणाधिकरणे च टीकायां 'भोक्ता भोग्यम्' इति वाक्यं गृहीत्वा त्रिविधोपासनं दर्शितम् । ब्रह्म भवतीति । त्रयं त्रिविधं ब्रह्म यदा विन्दते, एतत् तदेति वा । मुच्यते सर्वपाशैरिति पूर्वमन्त्रान्वयापेक्षयेदं युक्ततरम् । ९

उक्तमेव त्रयवेदनं विशदीक्रियते क्षरमिति मन्त्रेण । त्रयवेदनमित्यनेन ब्रह्मण इव प्रकृत्यादेरपि पार्थक्येन स्वातन्त्र्येण वेदनं मुक्तिहेतुरिति नोच्यते, किंतु प्रकृतिपुरुषविशिष्टत्वेन परमात्मवेदनमेव त्रयवेदनं नाम । तथा वेदनमपि न श्रवणादिमात्रम्, किंतु तत्त्वभावरूपं दर्शनसमानाकारपर्यवसन्नमित्युक्तं भवति । क्षरमक्षरञ्चेति प्रागुक्तक्षराक्षरविवरणं क्रियते क्षरमिति । अमृताक्षरमिति । प्रधानमपि क्वचिदक्षरमिति व्यपदिश्यते । क्षरणं चेतनाचेतनसाधारणम्; मरणं चेतन एव व्यवह्रियमाणं लोके । तद् द्वयं वस्तुगत्या चेतनस्य नास्तीति अमृताक्षरत्वमस्य । अमृतवत् स्वयमेव भोग्यम् अमृतभूत-

तस्याभिध्यानात् योजनात् तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्तिः

स अमृताक्षरम् । अमृतत्वात्=मरणधर्मशून्यत्वादक्षरमित्यर्थः । क्षरात्मानौ....एकः । क्षराक्षरशब्दितचेतनाचेतनवर्गेशिता, 'अपहतपाप्मा दिव्यो देव एको नारायणः' इति निर्दिष्टो नारायण इत्यर्थः । तस्याभिध्यानादिति । अभिध्यानमारम्ब(म्भ)णसंशीलनम् । योजनं योग । तत्त्वभावः तत्त्वाविर्भाव । एतै अन्ते शरीरावसाने भूय समस्तप्रकृतिसंबन्धनिवृत्तिरित्यर्थः । ततश्च तथ यदा विन्दते ब्रह्ममेतदिति मन्त्रोक्ता मुक्तिः ब्रह्मोपासनकालीनब्रह्मानुभवरूपेत्यर्थः । (१०)

परमात्मसंबन्धि च सदपि इदमक्षर हन्त क्षुद्रमन्यद् भोगाय हरतीति चानुशोच्यते । अत्र हर इत्यस्य रुद्रपरतया देव एक इत्यत्र नान्वयः; व्यवहितत्वात् अमृताक्षरशब्दस्यैकस्योद्देश्यविधेयोभयासमर्पकत्वाच्चेति (१३-२) तात्पर्यचन्द्रिकायामुक्तम् । अभिध्यानादिपदानामर्थः श्रमसाधिकरणटीकायामुक्त एव । आरम्भणसंशीलनमिति पाठेऽपि आलम्बनसंशीलनमित्येवार्थः । आरभ्यते (रलयोरभेदात्) आलभ्यते स्पृश्यत इति आरम्भणमालम्बनम् । योगाद् व्युत्थितस्यापि अनवरत चित्तालम्बनभूतध्येयवस्तुपरिशीलन योगकाले अविच्छिन्नानुसंधाने उपयुज्यते । तत्त्वाविर्भावो नाम दर्शनसमानाकारं ज्ञानम् । तत्त्वे भावः अवस्था तत्त्वभाव इत्यर्थेन भक्तिरूपापन्न ज्ञमपि गम्येत । अत्र पञ्चम्यन्तत्रयोक्तेषु पूर्वपूर्वस्योत्तरोत्तरहेतुत्वमस्ति । एवम्भूतज्ञानात् प्रथमं मायानिवृत्तिः; भूयश्च अन्ते—शरीरावसाने अन्तिमप्रत्ययकाले तत एव दर्शनात्मकध्यानात् अन्या मायानिवृत्तिरिति । अयमर्थ उत्तरमन्त्रे स्पष्टं भाविष्यते । संभवत्सर्वविधफलप्रतिपादकत्वात् तस्य । (१०)

**ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः ॥११॥**

ज्ञानसाध्यमुक्तिक्रमं दर्शयति ज्ञात्वेति । दर्शनसमानाकारज्ञानेन विषयीकृत्य सर्वपाशशब्दितपापहानिर्भवति । "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ" इति सूत्रे दर्शनसमानाकारज्ञानारम्भसमये पूर्वोत्तरपुण्यापुण्यकर्मणाम्, 'उपासनावसाने क्षमिष्ये' इति भगवत्सङ्कल्परूपाश्लेषविनाशौ भवत इत्युक्ते । क्षीणैः क्लेशपापघनशरीरेन्द्रियादिभिः सह जन्ममृत्युप्रापककर्मणाम्, 'क्षान्तम्' इति संकल्परूपा प्रकृष्टा हानिर्भवति । "साम्पराये तर्तव्याभावात्—"इत्यत्र सकलपुण्यापुण्यकर्मणां पूर्वं दर्शनसमानाकारज्ञानारम्भसमये, क्षमिष्य इति भगवत्सङ्कल्परूपाश्लेषविनाशवत्ता क्षान्तमिति संकल्परूपप्रकृष्टहान्यभ्युपगमात् । तस्याभिध्यानपरमफलीभूतमपहतपाप्मत्वादिलक्षणं विश्वातिशायि तृतीयमैश्वर्यं तु

ज्ञात्वेति ज्ञान पूर्वोक्तः तत्त्वभावः । हानिः हानं पुरुषक्रिया । 'तत् सुकृतदुष्कृते धूनुते' इतिवत् । तस्याः ज्ञानसमानकर्तृकत्वात् क्त्वाप्रत्यय उपपद्यते । देहभेदे—देहविशेषे । 'अत्र ब्रह्म समश्नुत' इति श्रुत्या सोऽश्नुते सर्वान् कामानिहैवेति न मन्तव्यमित्युपदिश्यते केवल आप्तकाम इति । केवलोद्देशेन आप्तकामत्वविधायकं पृथग्वाक्यमिदम् ।

अत्र मन्त्रेऽयमर्थः स्वरसतः प्रतीयते—पूर्वोक्तात् दर्शनसमानाकारध्यानात् सर्वपापहानौ तत्साध्यानां क्लेशानां क्षीणत्वादननुभाव्यत्वात् तदर्थजननमरणरूपबन्धहीनो भवति पुरुषः । प्रहाणिरित्यत्र प्रशब्देन प्रलयकालिकजन्ममृत्युहानिविलक्षणं पुनर्जन्मादिप्रागभावासमानकालिकत्वविशिष्टं जन्ममृत्युहानं ज्ञाप्यते । तदयं पाप्मजन्मजरणादिवर्जितत्वात् केवल एव । अथाप्यस्य चिदात्मक-

एतत् ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किञ्चित् ।
भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥ १२ ॥

प्राकृतदेहभिन्नशुद्धसत्त्वमयदेहभेदे भवति । केवलः प्रकृतिसंबन्धविनिर्मुक्त एव देशविशेषविशिष्टं ब्रह्म प्राप्य आप्तकामो भवति ; न तु प्रकृतिमण्डले इति भाव । (११)

एतत्-ज्ञेयं....किञ्चित् । एवम्भूतं परं ब्रह्म आत्मन्यन्तर्या-

---

ब्रह्मसायुज्यरूपं भोगसाम्यमप्राकृतदेहप्राप्त्या परमपदे भगवत्पद्मसंश्रयसमनन्तरमेव । देहवियोगकाल एव प्राकृतभोगहेतुसर्वकर्मक्षयेऽपि 'स्यात् धीसंकोचमात्रस्थितिरदनुगतः सूक्ष्मसंस्कारयोगः' । तदङ्गरूपे तस्मिन् सायुज्ये सति पुरुषोऽयं सत्यकामः सत्यसंकल्पश्चाप्तकामो भवति । एवञ्चेमं तृतीयं विश्वैश्वर्यरूपं विशेषमविदुषामयथाभूतवेदान्तिनां केवले केवलभावे निःश्रेयसविश्रमणं न श्रेय इति । तथाच ब्रह्मवेदनपर्यंक्रमः पूर्वमन्त्रोक्तः ; तत्फलपर्यंक्रम इह विशदमुच्यते, यत् 'भूयश्चान्ते' इति प्राक् संगृहीतमिति । सर्वमिदं भाष्यसंमतमेव । परंतु पूर्वार्धे पापहानावुक्तायां तत्कार्यहानेरर्थसिद्धत्वात्, 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति रीत्या कार्यपरम्पराकथनस्य प्रकृते व्यर्थत्वात् पापहानस्य ध्यानप्रारम्भ-अवसानदशाभेदेन स्थितं द्वैविध्यं युक्तमिह वक्तुमिति तथा भाषितम् । (११)

विश्वैश्वर्यमित्युक्तया स्यात् जगद्व्यापारादिरूपमैश्वर्यमस्य । तथाच सर्वप्रकारं परमं साम्यमिति वा परमात्मैक्यं वा न मन्तव्यमित्युपदिश्यते एतदित्यादिना । नित्यमेवात्मसंस्थमिति । जीवात्मनो देवात्मनश्च शरीरात्मभावरूपः संबन्धोऽनपायः । अतोऽयं सदाऽपि तदधीन एवेति नास्य तदैक्यं तदत्यन्तसर्वप्रकारसाम्यं वेति भावः

मितया संश्लिष्टं ज्ञेयम् । ज्ञातवतश्च ज्ञातव्यान्तरं नावशिष्यते । भोक्ता .. ब्रह्ममेतत् । 'भोक्तृशरीरकत्वं भोग्यशरीरकत्वमपहतपाप्मत्वादिविशिष्टमत्यज्ञानादिस्वरूपत्वमिति त्रियाकारविशिष्टं ब्रह्म ज्ञातव्यम्' इति वेदार्थसंग्रहे वर्णितम्। केचित्तु, 'भोक्ता भोग्यं प्रेरितेत्येनत् त्रिविधं प्रोक्तमेतत् सर्वं मत्वा ब्रह्म भवति=मुक्तो भवतीत्यर्थः । इत्युपसंहार'

एवञ्च विश्वैश्वर्यं नाम भाष्योक्तरीत्या विश्वातिशायि प्राकृतप्रपञ्चातिशायितमैश्वर्यम्, यद्वा विश्वं—समस्तम् जीवेन यावत् संपादयितुं शक्यम्, तावदैश्वर्यमित्यस्तु । नन्विय सगुणावस्था । निर्गुणावस्थाया तु स्वादैक्यमित्यपि नेति ज्ञाप्यते, नातः परं वेदितव्यं हि किञ्चिदिति । एवञ्च अचेतनशरीरकत्ववत् चेतनशरीरकत्वमपि ब्रह्मणः सार्वकालिकमिति प्रदर्शनपूर्वं निगम्यते भोक्तेत्यादिना । वेदार्थसंग्रह इति । तत्रेय सूक्तिः, "एवम्भूतभोक्तृभोग्ययोरन्तर्यामिरूपेणावस्थानम्, स्वरूपेण चापरिमितगुणौघाश्रयत्वेनावस्थानमिति परस्य ब्रह्मणः त्रिविधावस्थानं ज्ञातव्यमित्यर्थः" इति । केचित्त्विति । ननु मत्वेत्यस्य मन्तव्यं=ज्ञातव्यमित्यर्थाश्रयणायोगात्, 'ब्रह्ममेतत्' इति पूर्वत्र, 'ब्रह्म भवति' इति टीकाया व्याख्यातत्वाच्च तथैवेहापि ब्रह्ममेतदित्यस्य व्याख्यानसम्भवात् वेदार्थसंग्रहस्यापि कैश्चिदुदितएवाथ तात्पर्यं किं न स्यात्, अत. पक्षान्तरतया निर्देशः कुत इति चेत्—उच्यते – वेदार्थसंग्रहव्याख्यायां तात्पर्यदीपिकायामत्र सन्दर्भे, 'सद्वारकमाकारद्वयमद्वारकं एकं आकारश्चेति ब्रह्म त्रिविधम्—तत्तदन्तर्यामितयावस्थानं स्वरूपेणावस्थानं चेति त्रिविधम्' इत्येतावन्मात्रोक्तावपि पूर्वत्र, "भोक्तृभोग्यनियन्तॄन् ज्ञात्वा त्रिविधमेतद्

वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिङ्गनाशः ।
स भूय एवेन्धनयोनिगृह्य तद्वोभयं वै प्रणवेन देहे ॥ १३ ॥
आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासात् देवं पश्येन्निगूढवत् ॥ १४ ॥

न तत्मता अपह्नोर्हेत्याह वह्नेरिति । **योनिगतस्य** कारणभूता रणिगतस्य **मूर्तिः** स्वरूपं प्रत्यक्षेण न दृश्यते । लिङ्गं तु दृश्यते । पश्चात् मथने सतीन्धनयोनितयेन्धनप्रभवतया गृह्यते । तद्वत् प्रणवेन परमात्म शरीरभूते जीवे शोध्यमाने पूर्वमप्रतीतस्यान्तर्यामिणः सूक्ष्मवस्त्राञ्चल न्तर्गतमाणिक्यवत् प्रत्यग्वस्त्वन्तर्गतस्योपलब्धिर्भवतीत्यर्थः । **तद्वोभय**मित्यत्र वाशब्द इवार्थः । (१३)

प्रणवेन प्रकाशप्रकारमेव दर्शयति आत्मानमिति । स्वात्मनि प्रणवेन ध्यायमाने तदन्तर्गत आत्मा निगूढवत् स्थितः प्रकाशत इत्यर्थः । (१४)

ध्याने मन्त्रं प्रदर्श्यते वह्नेरिति । लिङ्गनाशः लिङ्गानुपलम्भः । णश अदर्शने इति हि धातुः । स भूय एवेति । भूयः पश्चात् । स एव साक्षात् वह्निरेवेत्यर्थः । उभयम् देवात्मा तच्चिह्नश्चेति द्वयम् । तदभिव्यक्तिप्राचीनानि च चिह्नानि अनन्तराध्याये नीहारधूमेति मन्त्रेण गणयिष्यन्ते । पाञ्चभौतिकस्य देहस्य प्रणवार्थत्वाभावेन उत्तरारणिस्थानापन्नप्रणवमथ्यमानत्वायोगात् देहशब्दः परमात्मशरीरभूतजीवात्मपरः । उत्तरारणिर्नाम उपरितनमरणिभूतं मन्थनकाष्ठम् ।

निगूढवदित्यस्य निगूढाग्निवत् इत्यर्थः अरणिनिदर्शनबलात्, 'पश्येत् ब्रह्माग्निगूढवत्' इति ध्यानबिन्दूपनिषदुदाहृतसजातीयमन्त्रचतुर्थपादतश्च ज्ञायते । अन्यानि च निगूढानि अनन्तरमन्त्रेण दर्श्यन्ते । प्रणवेन मथनञ्च विहितप्रतिषिद्धाचरणानाचरणपूर्वक

तिलेषु तैलं दधनीव सर्पिः आपः स्रोतस्स्वरणीषु चाग्निः ।
एवमात्माऽऽत्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति ॥ १५ ॥
सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् ।
आत्मविद्यातपोमूलं तत् ब्रह्मोपनिषत्परम् तद्ब्रह्मोपनिषत्परम् ॥ १६ ॥

इति श्वेताश्वतरोपनिषदि प्रथमोऽध्यायः ॥

तदेव प्रपञ्चयति तिलेषु . पश्यति । यथा तिलादिस्थि-तैलादिकं यन्त्रपीडनाद्युपायेन गृह्यते, एवं सत्यतपोलक्षणोपायेन परमात्मा गृह्यत इत्यर्थः । (१५)

सर्वव्यापिनमिति । क्षीरार्पितसर्पिस्समतया सर्वव्याप्तमात्मानं प्रत्यगात्मविद्यया तपसा च ज्ञेयमुपनिषदा पर प्रतिपाद्य तत् परं ब्रह्म विद्यादित्यर्थः । द्विर्वचनमादरार्थमध्यायसमाप्तिद्योतनार्थं च । (१६)

इति प्रथमाध्यायप्रकाशिका ॥

मित्युच्यते सत्येनेत्यादिना । सत्यं यमान्तर्भूतम्, तपो नियमान्तर्गतम् । एवं सत्य सामान्यधर्मः, तपो विशेषधर्मः ।

सर्वव्यापिनम् अन्तर्बहिश्च व्याप्तम् अणावात्मनि तद्धर्मभूतज्ञानविकासे च कार्त्स्न्येन व्याप्तम् । गुरुमुखगृहीतस्वाध्यायादिकमिति सूच्यते उपनिषत्परमिति । अत्र पूर्वमन्त्रे अनुपश्यतीत्यनेनान्वयः सुवचः । पूर्वार्धमात्रस्य वा तथाऽन्वयं कृत्वा उत्तरार्धं प्रथमान्तपदात्मकं पृथग्वाक्यमित्यपि सुवचम्—अथापि मन्त्रभेदाद् वाक्यभेदो युक्त इति विद्यादिति पदाध्याहारः ।

द्विर्वचनमिति । अत्र न प्रत्यध्यायं द्विर्वचनं श्रूयते । अध्यायसमाप्तिद्योतनार्थत्वे तदावश्यकमिति चेत्—आदरार्थमित्यस्तु । आदरश्च प्रथमाध्यायोक्तस्यैवार्थस्य विवरणमनन्तराध्यायैः क्रियत इति अस्य सर्वसमासरूपत्वादिति भाव्यम् ।

॥ अथ द्वितीयोऽध्यायः ॥

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः ।
अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभवत् ॥ १ ॥

आत्मसंस्थपरमात्मप्रतीत्यौपयिकेन्द्रियनिग्रहरूपतपस्सिद्ध्यनुगुणं भगवत्प्रार्थनामन्त्रमाह युञ्जान इति । धियः सविता प्रेरकः परमात्मा पृथिव्याः अधि ऊर्ध्वमग्निं ज्योतिः अग्निरूपं ज्योतिः निचाय्य संपूज्य अग्निहोत्रादिकर्म (त्रिकं) कृत्वा मनः तत्त्वाय साक्षात्काराय पृथिवीनिष्ठाग्निज्योतिस्सदृशस्वात्मनिष्ठपरमात्मतत्त्वसाक्षात्काराय युञ्जानो नियुञ्जानः आभवत् भवत्वित्यर्थः । [तत्त्वसाक्षात्काराय परमात्मनि मनो नियुञ्जानो भवत्वित्यर्थः] (१)

ध्याननिर्मथनाभ्यासं प्रागुक्तमधिकृत्य वक्तुं द्वितीयाध्यायस्यारम्भः । अत्र धीपदसवितृपदादेरभ्यसनात्, 'तदक्षरं तत् सवितुर्वरेण्य'मिति वक्ष्यमाणरीत्या गायत्रीमन्त्रस्यानुसंधापनं कृतं भवति । तेन संध्योपासनादेर्योगोपयोगितया आवश्यकत्वं सूच्यते, "वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः" इति च श्रीविष्णुपुराणम् ।

संपूज्येति । अस्य परमात्मकर्तृकत्वनाधारात् साक्षात्कारायेति जीवात्मकर्तृकक्रियायामन्वयः कार्यः । एवञ्च मूले निचाय्येति तत्त्वायेत्यत्रान्वेतीति वक्तव्यम् । न च तत्त्वपदं क्रियावाचि । तत् कथं क्रियानन्वये ल्यप् इति चेन्न—साक्षात्कारायेति क्रियार्थस्योक्तत्वात् । अथवा निचाय्य साक्षात्कार्यायेति तत्त्वायेत्यध्याहारेण योजना । यद्वा निचाय्येत्यस्य संकल्प्य, प्रदर्श्येत्येवमर्थोऽस्तु । तच्च परमात्मकर्तृकमेवेति । अग्निज्योतिरित्यग्निहोत्रोपस्थापनेन, 'अरणिप्रभृतिनिष्ठाग्नितुल्यतया प्राग्दर्शितस्वात्मनिष्ठपरमात्मज्योतिर्ग्रहणोपयोगित्वमस्या-

युक्तेन मनसा वय देवस्य सवितु सवे ।
सुवर्गेयाय शक्त्या ॥ २ ॥
युक्त्वाय मनसा देवान् सुवर्यतो धिया दिवम् ।
बृहज्ज्योति करिष्यत सविता प्रसुवाति तान् ॥ ३ ॥

युक्तेनेति । सवितुः प्रेरकस्य परमात्मन सवे अनुज्ञाया सत्याम्—अनुज्ञयेति यावत्—**युक्तेन मनसा** आत्मप्रवणेन चेतसा युक्ता वय **सुवर्गेयाय स्वर्ग**शब्दितभगवल्लोकसाधनाय परमात्मनिदिध्यासनाख्य-कर्मणे शक्त्या युक्ता भवेमेत्यर्थ । (२)

'परमात्मा प्रणिपातमात्रेण कथमनुज्ञा प्रयच्छेत्' इत्याशङ्क्य भगवदन्तरङ्गभूतविश्वक्सेनाद्याचार्यप्रणामपूर्वक भगवत्प्रार्थो वर्तमानाना मनुज्ञा प्रयच्छन्तीत्याह **युक्त्वाये**ति । **सुव** स्वर्ग लोक भगवल्लोक **यतः** गतान् **देवान्** पूर्वाचार्यान् **मनसा युक्त्वाय**— छन्दसि, 'क्त्वो यक्' इति यक् । मनसा युक्त्वाय—प्रणम्येति यावत्—**दिव** द्योतमान निरतिशयबृहत्त्वयुक्त परमात्मरूप ज्योति **धिया** उपासनरूपज्ञानेन **करिष्यतः** विषयीकरिष्यत -ध्यातु प्रवृत्तानिति यावत्--**तान्** मुमुक्षून् **सविता** प्रेरक परमात्मा **प्रसुवाति** अनुजानातीत्यर्थ । [इति वय मन्यामहे इति शेष] । (३)

परमात्मनि मनोयोग तत्समाराधन (तत्साधन) कर्म च, केषा-

विहोत्तस्य युक्त मिति सूच्यत इत्याशयेन सदशेत्यन्तविशेषणम् ।
क्त्वो यक् इति । यक् आगम जात् क्त्वाप्रत्ययान्ते तन्निवेशात् युक्त्वायेति रूपम् । अस्य करिष्यत इति द्वितीयाबहुवचनेनान्वय ।
योगिनामपि सर्वेषा भगवद्गतेनान्तरात्मना तत्परिचर्यैकपरस्य

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चित ।
वि होत्रा दधे वयुनाविदेक इन्महीदेवस्य सवितु परिष्टुति ॥ ४ ॥
युजे वा ब्रह्म पूर्व्यं नमोभिर्विश्लोक एतु पथ्येव सूरे ।

ध्रि(त युगप)देव भवतीत्याह युञ्जत इति । 'विप्रो विप्रत्व गच्छते तत्त्वदर्शी' इत्युक्तरीत्या विप्राः तत्त्वदर्शिन परमात्मनि मन नियुञ्जते योजयन्ति । धियः ध्यानानि च योजयन्ति । विप्रस्य—प्रा पूरणे—पूर्णस्य, बृहतः गुणै बृहत्त्वाश्रयस्य विपश्चितः सर्वज्ञस्य महीदेवस्य मह्या भूम्या समेतस्य देवस्य श्रीभूमिसमेतस्य सवितुः प्रेरकस्य वयुनावित् वयुन ज्ञानम्—वयुनाविदिति छान्दसो दीर्घ—तस्य सार्वज्ञ्यादिमहिमविदित्यर्थ । तदाश्रय एक इत् एक एव परिष्टुतिः—परिष्टुतीरित्यर्थ—छान्दस ह्रस्वत्वम् । (परिचर्येति ?) परिचर्या इति यावत्—होत्रा ऋत्विग्भि, मन्त्रेणेति वाऽर्थ विदधे कृतवा नित्यर्थ । [तदाश्रयब्रह्ममहिमविस्त्वमेव भगवत्परिचरणमिति] ब्रह्मस्वरूपविदेव तत्परिचर्याकारी, तेन कृतमेव (ब्रह्मस्वरूपवित्परिचर्या एव तत्परिचर्या । तया कृतमेव) भगवत्परिचरण भगवत्प्रीणन भवतीत्यर्थं ।

युजे वामिति । दिव्यस्थानस्थिता सर्वे ब्रह्मपुत्रा मत्प्रार्थना

दौर्लभ्य प्रदर्श्यते युञ्जत इति । देवशब्दस्य पतिपर्यायत्वाभावात् मह्या समेतो देव महीदेव इति मध्यमपदलोपी समास । अत्र महीति पृथक्पद मत्वा, परिष्टुतिरित्यत्रापि छान्दस दीर्घमप्रकल्प्य, मही भूमि, तत्स्थ सर्वोऽपि देवस्य परिष्टुति विभूति स्तवकरणाहति वा, देवस्य परिष्टुति स्तुति मही महतीति वाऽर्थो भाव्येत। परतु तदा वाक्यभेद सोढव्य । तदा विदध इत्यत्र किञ्चित् कर्माप्यध्याहार्यम् । होत्रा -होमादिक्रिया इति कमति केचित् ।

श्रृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थु ॥५॥
अग्निर्यत्राभिमथ्यते वायुर्यत्राधिरुध्यते ।
सोमो यत्रातिरिच्यते तत्र सजायते मन ॥ ६ ॥
सवित्रा प्रसवेन जुषेत ब्रह्म पूर्व्यम् ।

श्रृण्वन्तु । **सूरेः** नित्यसूरिकर्तृका, स्तुतिपथादनपेतत्वेन **पथ्या** स्तुति । **वां पूर्व्यं** व पूर्वमित्यर्थ । वचनव्यत्ययश्छान्दस । सा(स) तादृश ब्रह्म यथा प्राप्नोति, एवं **युजे** योगाय—ब्रह्मप्राप्तये इति यावत्—मया कृत **विश्लोकः** विविध श्लोक स्तोत्ररूप **एतु** प्राप्नोतु । नित्य सूरिकृता स्तुति यथा भगवानङ्गीकरोति, एवमङ्गीकरोत्वित्यर्थ । ततश्च योगप्रवृत्ते प्राक् भगवत्स्तुति कर्तव्येत्युक्त भवति ।

योगमारभमाणस्य शीतोष्णादेश परिहर्तव्य इत्याह **अग्निरिति ।** **अभिमथ्यते** अभितो निवार्यते । **अधिरुध्यते** आधिक्येन रुध्यते । वायुर्यत्र न वातीत्यर्थ । **सोम**शब्देन हिम लक्ष्यते । अतिशयेन **रिच्यते** निरस्यते । तत्र मन प्रत्यक्प्रवण जायत इत्यथ । (६)

सवित्रेति । एव गुरुप्रणामभगवत्स्तुतिप्रसङ्गेन सवित्रा कृतेन **प्रसवेन** अनुज्ञया--तदनुज्ञातस्सन्निति यावत्--**पूर्व्यं** पूर्वसृष्ट (श्रेष्ठ) ब्रह्म

व पूर्वमिति । पुत्रभूतयु मदपेक्षया पूर्वभूतमित्यर्थ । नित्यसूरिपक्षया ब्रह्मण पूर्वत्व तेषा पुत्र शब्द तेषा तदनुत्पन्नत्वेऽपि तदधीनस्वरूपस्थितिप्रवृत्तिमत्त्वात् । नमोभि प्रणामे सहेत्यर्थ । विश्लोक एतु पथ्येव सूरे । असमर्थकर्तृकत्वादपथ्योऽपि श्लोक सूरिकर्तृकपथ्यस्तुतिवदङ्गीकार्य इति नैच्यानुसधानम् ।

देवपरिष्टुतिभूताया महा ध्यानोपयोगि स्थलमाह अग्निरिति ।

शृण्वन्तु विश्वे अमृतस्य पुत्रा विवर्जिते शब्दजलाश(श्र)यादिभि ।
अग्निर्यत्राभिमथ्यते वायुर्यत्र ने गुहानिवाताश्रयणेन योजयेत् ॥ १० ॥
सोमो यत्रातिरिच्यते तत्रधि स्ववश करोति, तथा मनोनिरोधज्ञो मन
मयित्वा प्रसवेन जुषेत ब्र(९)

शृण्वन्तु । सूरेः नित्यम् योग देश विस्तरेणाह सम इति । निम्नोन्नत
वा पूर्व्यं व पूर्व शुद्धे क्षुद्रपाषाणवह्निसिकतारहिते वाद्यध्वनिजलाशयाद्य
ब्रह्म यथा प्राप्नोति हिते मनोनुकूले चक्षु पीडाहेतुभूतोष्ण्या(एकादि)रहिते
कृत विश्लोक निवातदेशाश्रयणेन योगमनुतिष्ठेदित्यर्थ । सूत्रितञ्चैतत्,
सुरिक्षता स्तु ॥ तत्राविशेषात् ” इति ।
योगप्रवृत्ते
तत्र हि, आसीनस्तिष्ठन् गच्छन् वोपासीत अविशेषादिति
(क्षिते) उच्यते—“आसीन सम्भवात्” । आसीन एव उपा-
अभिम । तस्यैव उपासनस्य सम्भवात् । तिष्ठतो गच्छतश्च यत्नसापेक्षत्वात्,
वायुर्य नस्य निद्राप्रसक्तेश्च, उपासनस्य ध्यानरूपत्वाच्च एकाग्रचित्ततावश्य
नि भावात्, चित्तैकाग्र्यस्य आसनमापेक्षत्वाच्च आसीन एव कुर्यात् ।
“‘अचलत्वञ्चापेक्ष्य’ । ध्यायनीव पृथिवी ध्यायतीवान्तरिक्षम्’ इत्यादिषु
प्र

अथ धारणाध्यानसमाधिरूपो योगो देशविशेषोपदेशपूर्वक
मुच्यते सम इति । पूर्वम्, ‘अग्नियत्र’ इति मन्त्रसन्निधावनुक्त्वा इह
विस्तरेण देशाव्युत्पादन प्रत्याहारपर्यन्तापेक्षया योगाथ देशविशेषा-
न्वेषणमत्यावश्यकमिति ज्ञतये । शब्दजलाशयादिभिरित्यस्य मनोनु
कूले इत्यत्रान्वयायोगात्, पूर्वस्मात् पदात् विवर्जिते इत्यस्य पूर्वभाग
विवर्जितस्यानुषङ्ग । न चक्षु पीडन इत्यत्र पर्युदासनञोऽयसमास,
‘विम्लानो न विमर्दने’ (न्या कु) इत्यादिवत् ।

नीहारधूमार्कानिलानलानां खद्योतविद्युत्स्फटिकशशिनाम् ।
एतानि रूपाणि पुरस्सराणि ब्रह्मण्यभिव्यक्तिकराणि योगे ॥ ११ ॥
पृथ्व्यप्तेजोनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते ।

निश्चलत्वधर्मेण ध्यातृसाम्यव्यपदेशदर्शनात् ध्यातृनिश्चलत्वस्यापेक्षितत्वात् निश्चलत्वस्य च आसिकामन्तरेणासम्भवात् आसीन एव कुर्यात् । "स्मरन्ति च", 'उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये' इति । "यत्रैकाग्रता तत्राविशेषात्" । 'समे शुचौ शर्करावह्निवालुकाविवर्जिते' इत्यविशेषेण एकाग्रतानुकूलदेशविशेषस्यैवाऽऽत्वकीर्तनात् तेनैव [च] न्यायेन एकाग्रतानुकूलस्याऽऽस(साध)नस्यापेक्षितत्वमस्तीत्यत्र सीयन इति स्थितम् । प्रकृतमनुसराम । (१०)

योगमभ्यस्यतो ब्रह्माभिव्यक्तिप्राचीनानि तच्चिह्नान्याह नीहारेति प्रथमतो नीहारवत् स्फुरन्ति, ततो धूमार्कानिलाद्याकारतया स्फुरति । एवम्भूतानि स्फुरणानि पूर्वप्रवृत्तानि आगामिब्रह्माभिव्यक्तिचिह्नानीत्यर्थः ।

योगाभ्यासस्य कायसिद्धिफलकत्वमाह पृथ्वीति । गुणः गुणनमभ्यास । योगाभ्यासे प्रवृत्ते सति योगमहिम्ना सत्त्वप्रचुरभूतारब्धे

नीहारादिस्फूर्तिक्रमे उत्तरोत्तर प्रसन्नतापकाशमानतयोत्कर्षस्थितिर्भाव्या ।

न्यात्विकादिभेदेन पार्थिवादिप्रकारभेदेन च विचित्राणामाहाराणां सेवनेन प्राणायामयोगाभ्यासबलेन इवाऽऽहारबलादपि कायस्य विचित्ररूप परिणाम संपद्यते। इद फलञ्च, योगसिद्धिचिह्नञ्च भवतीत्युच्यते पृथ्वीति । पञ्चात्मके देहे पृथिव्यादेरेकस्यापि योगाधीनो गुणातिशयो भवतीति ज्ञापनाय पृथ्व्यादीनां विशिष्य निर्देशः ।

न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम् ॥ १२ ॥
लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौष्ठवञ्च ।
गन्धः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदन्ति ॥ १३ ॥
यथैव बिम्बं मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधान्त(क्त?)म् ।
तद्वात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः ॥ १४ ॥

पाञ्चभौतिके शरीरे समुत्थिते तादृशसर्वरोगादिदाहसमर्थत्वेनाग्निरूपेण योगेनारब्धशरीरयुक्तस्य पुंसो रोगादिर्न सम्भवतीत्यर्थः । (१२)

लघुत्वमिति । स्पष्टोऽर्थः । (१३)

योगमभ्यस्यतो ब्रह्मोपलब्धिप्रकारं तत्फलञ्चाह यथैवेति । मृदा अयसा वा उपलिप्तः निर्मितः प्रतिमाविशेषः सुधाविशेषान्त (विशेषा-क्त (?)) रञ्जकद्रव्यलिप्तस्सन् तेजोमय(जोरूप)तया दीप्यते । तद्वत् सुधाविशेषलिप्ततेजोमय(जोविशेष)प्रतिमासम दर्शनसमानाकारध्यानेनोपलभ्य कश्चित् पुरुषधौरेयो निवृत्तसंसारगन्धः सिद्धार्थो भवतीत्यर्थः । तद्वेत्यत्र वाशब्द इवार्थः । तद्वत् सतत्त्वं प्रसमीक्ष्येति पाठेऽप्यय-मेवार्थः । केचित्तु सुधान्तमिति मत्वा सुधौतमित्यर्थे (सुधातरित्यर्थे)

'सत्त्वं लघु प्रकाशकम्' इत्युक्तरीत्या सत्त्वातिशयो लघुत्वमित्या-दिना प्रदर्श्यते । उक्तेषु लघुत्वादिषु वातपित्तश्लेष्माद्यात्मनि शरीरे कतमस्य भूतस्य गुणप्रकर्षात् कतमद् भवतीत्यपि विमृश्यावधार्यम् ।

एवं सिद्धिमता योगमविच्छिन्नमभ्यस्यता प्रथमतः शुद्धं स्वात्म-तत्त्वं समीक्ष्यत इतीदं सदृष्टान्तमुच्यते यथैवेति । सुधान्तमित्यस्य सुधा अन्तो रञ्जकतया यस्य तदिति व्युत्पत्तिः । अनाय भाष्यप्रती-तोऽर्थः—मृदादिनिर्मितं सुधया संघृष्टं बिम्बं यथा तेजोमयं प्रकाशमानमस्तीति । सुधान्तमिति मत्वेति । अत्र भाष्यसंमतः पाठः

यदाऽऽत्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत् ।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥१५॥

सुधान्तमिति शब्द इत्यपि वदन्ति । (१४)

यदाऽऽत्मेति । यदा योगयुक्तः परमात्मप्रतीत्युपायभूतेन प्रणवप्रतिपादितपरमात्मशेषभावेन प्रत्यगात्मना साधनेन (संबन्धेन) तत्स्थं अजम् अनादि ध्रुवम् अनन्तं विशुद्धं हेयप्रतिभटं सर्वतत्त्वैः-अत्रमुपाध्यायोक्तरीत्या सर्वतत्त्वात्मकास्त्रभूषणोपेतं परं ब्रह्म सूक्ष्मवस्त्रान्तरितमाणिक्यवत् पश्येत्, तदा सर्व [बन्धक] कर्महानिर्भवतीत्यर्थः । (१५)

क इति विमृश्यम् । इत्यपि वदन्तीति । शाङ्करभाष्यत्वेन प्रसिद्धे एवमुक्तमस्ति । तत्रोक्तो वाक्यार्थस्तावत्–बिम्बं मृदा मलिनितं पश्चात् सुधौतं=क्षालितं चेत् तेजोमयं भ्राजेत, तथा परमात्मा समीक्ष्यते इति । बिम्बश्च लोहादिकृतं ग्राह्यम् । तेजोमयमिति वा तैजससुवर्णादिमयार्थकमिति । बिम्बं नाम आदर्श इत्यपि कश्चित् ।

नन्वत्रोत्तरमन्त्रे ब्रह्मतत्त्वातिरिक्तस्य आत्मतत्त्वस्य निर्देक्ष्यमाणत्वात् आत्मतत्त्वं प्रसमीक्ष्य इति तदीक्षणमेव वक्तुमुचितम्; न ब्रह्मतत्त्वेक्षणम् । एवञ्च जीवसाक्षात्कारानन्तरत्वात् परसाक्षात्कारस्य स वक्तव्य इहोक्तो भवति । तदिह सुवर्णादिना बिम्बनिर्माणकालस्थितिमनुसृत्य दृष्टान्तः प्रदर्श्यते । बिम्बनिर्माणार्थं प्रथमतः तत्तुल्याकृतिं निर्माय मृदा यथार्हं तामुपलिप्य अग्निना प्रतप्य मृदन्तर्गतं बिम्बाकृतिद्रव्यं द्रवीकृत्यापसार्य तत्स्थाने द्रवीकृतं सुवर्णादि निषिच्य बिम्बं क्रियते । तदा तस्यामवस्थायामन्तर्हितबिम्बकं मार्तिकद्रव्यं यथा स्यात्, तथेदमन्तर्निगूढपरमात्मकमात्मतत्त्वमस्ति; तत् समीक्षत इत्यर्थः स्यादिति चेत्—सत्यम् । आत्मतत्त्वमिति जीव एव गृह्यते । परंतु तथार्थवर्णने मृद एव जीवात्मदृष्टान्तत्वात् बिम्बस्य परमात्म-

एष हि देव प्रदिशोऽनु सर्वा पूर्वो हि जात स उ गर्भ अन्त ।

तस्य सर्वात्मकत्व प्रपञ्चयति एष हीति । हे जना इति परस्पर

दृगन्तत्वात्, यथा बिम्ब भ्राजते, तथा आत्मतत्त्वमिति कथन न युज्यते । आत्मतत्त्वमित्यस्य जीवात्मसबन्धि तत्त्व परमात्मेत्यर्थ वर्णने वैरूप्यम् । अतो भाष्योक्त एवार्थ । सुधान्तमिति पद-प्रसिद्धार्थनिर्वाहाय भाष्ये शाङ्करार्थत्याग । सुधौतमित्यर्थसभवे तु सोऽप्यर्थो नोपेक्ष्य कर्मवेष्टित जीवतत्त्वम्, मृदाद्युपलिप्त बिम्ब शोधित यथा तेजोमयम्, तथा दीप्त स्यात् ध्यानकाले इत्युक्ते समञ्जसत्वात् । सुधातमित्यपि पठन्ति । वीतशोक इति । जीवात्मदर्शन पूर्वोक्तनानाभिव्यक्तितुल्य न भवति । अपितु उपाय भूतविशिष्टदर्शनान्तर्भावार्हमिति भाव । एव वीतशोकस्यापि सर्वपाशमोक्षस्तु देवदर्शनादेवेति स्पष्टमुक्तम् । 'तद्वत् सतत्त्वम्' इति पाठे तु परमात्मग्रहणमपि भवेत् । आत्मतत्त्वशब्दे सति ह्यर्थ वैरूप्यशङ्का । एवञ्च कृतार्थत्वादिक सुसमन्वितम् । अथाप्यस्य जीव-मात्रपरत्व युक्तम् ।

एव जीवात्मतत्त्वसाक्षात्कार उक्त । अथ ब्रह्मसाक्षात्कार उच्यते यदेति । तत्स्थ परमित्युक्त्या मूले तत्त्वमित्येतत्स्थाने तत्स्थमिति पाठ ऊह्यते । अत एव भिन्नत्व तस्येत्याह परमिति । विशुद्धमित्यस्य हेयप्रतिभटमित्यर्थ । सर्वतत्त्वैरिति इत्थम्भूतलक्षणे तृतीया । तदाह भूषणोपेतमिति । अस्त्रभूषणाध्यायो विष्णुपुराणे (१-२२) 'भूषणास्त्रस्वरूपस्थ यथेदमखिल जगत् । बिभर्ति भगवान् विष्णुस्तन्ममाख्यातुमर्हसि' इत्यारभ्य द्रष्टव्य । अनेन दिव्यमङ्गल विग्रहोपासनमपि व्यञ्जितम् ।

प्रदिश इति बहुव्रीहि । सर्वा इति स्त्रीलिङ्गानुसारात्बहुव्री हिर्वा । प्रकृष्टा दिश प्रदिश । प्रकर्ष सर्वपदार्थोपाधिकम् ।

यो देवो अग्नौ यो अप्सु यो विश्वं भुवनमाविवेश ।
य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो नमः ॥ १७ ॥

इति श्वेताश्वतरोपनिषदि द्वितीयोऽध्यायः ॥

—:※:—

॥ अथ तृतीयोऽध्यायः ॥

य एको जालवानीशत ईशनीभिः सर्वान् लोकानीशत ईशनीभिः ।

अन्तर्यामितया सर्वात्मत्वम् ; न तु स्वरूपेणेत्येतत् प्रदर्शयति यो देव इति । स्पष्टोऽर्थः ॥ (१७)

॥ इति द्वितीयाध्यायप्रकाशिका ॥

—::—

उक्तज्ञानस्य फलमाह **य एक** इति । 'अपहतपाप्मा दिव्यो देव ' इति देवत्वेन श्रुतिप्रसिद्धः परमात्मा प्रकृतिशब्दितमायारूपवागुरायुक्तस्सन् *ईशनसमर्थाभिः ज्ञानबलक्रियाशक्तिभिः मायाजालगोचरान्* प्राकृतांश्च (न्) लोकान् ईष्टे तदगोचरान् अप्राकृतांश्च लोकान् ईष्टे।

तत्र जीवपरम् ; प्रतीच्च आत्मा प्रत्यगात्मेति आत्मपदं परं परमात्मपरमिति ; सर्वार्थसिद्धौ जीवसरे(७)तत्प्रत्यक्पदग्रहणात् । इह तु प्रत्यगिति परमात्मपरमेवेति । वस्तुतो जीवं प्रति परस्य मुख्यप्रत्यक्त्वस्य दुर्वचत्वेऽपि अहमितिभासमानत्वरूपसामान्याकारेण तद्विवक्षेह शरीरात्मभावव्यञ्जनायाऽऽदृता श्रुताविति न कश्चिद् दोष इति । प्रत्यगित्यस्य, एवं सर्वप्रत्यक्छरीरक' इत्येवार्थवर्णनसंभवेऽपि ज्ञानिभिः परमात्मा अहमित्येव गृह्यत इति विशेषव्युत्पादनायैतद्विवक्षेति ॥

इति द्वितीयाध्याय भाष्यपरिष्कारः ।

———

य एवैक उद्भवे संभवे च य एतद्विदुरमृतास्ते भवन्ति ॥ १ ॥
एको हि रुद्रो न द्वितीयाय तस्थु य इमान् लोकानीशत ईशनीभि ।

यश्च जगत उद्भवे उत्पत्तौ, सभवे —समित्येकीकारे—स्थापरपर्याये एकीभावे च [य] ईष्टे, तज्ज्ञानं मोक्षसाधनमित्यर्थ । (१)

ननु 'य एतद्विदुरमृतास्ते भवन्ति' इति पूर्वमन्त्रे सर्वलोकेश-नारायणज्ञानस्यैव मोक्षसाधनत्वमिति (नारायणस्यैव मोक्षसाधनज्ञान-विषयतया मोचकत्वमिति) यदुक्तम्, तदयुक्तम् । जगत्कारणत्वेन प्रसिद्धाना ज्ञानस्यैव मोक्षसाधनत्वमिति वक्तुमुचितत्वादित्याशङ्कयाह **एको हीति** । हे जना ! 'सर्वलोकानीशत ईशनीभि ,' 'प्रत्यक् तिष्ठति' इति विर्दिष्ट **विश्वा भुवनानि ससृज्य** सृष्ट्वा अन्तकाले **सञ्चुकोच** सहृतवान्, **गोपाः** गोप्ता रक्षिता च य, स एक एव **रुद्रः**— ससाररुज द्राव(द्रव) यतीति रुद्र —ससारमोचक इत्यर्थ । **द्वितीयाय** द्वितीयत्वाय सहायतया न केऽपि **तस्थुः** । सहायतया वा उपाया-

परमणङ्गेन योगेन आत्मतत्त्वसाक्षात्कारपूर्वक ब्रह्मतत्त्व-साक्षात्कारसपादनप्रकारो दर्शित । अथ तृतीये तस्यैकस्यैव मोक्षप्रदत्व प्रतिपाद्यते । एत विदुरिति वक्तव्ये, एतद्विदुरिति नपुसक-प्रयोगात् उद्भवसभवनियमनकर्तुरैक्यज्ञापने नैर्भर्य व्यज्यते । एत-दित्यस्य एक्यमित्यर्थ । (१)

नियमनरूपस्थितिकर्तु उद्भवकर्तु प्रलयकर्तुश्च प्रत्येकमैक्य वेदनीय-तयोक्तमिति न मन्तव्यम किं तु सर्वकर्तुरैक्यमिति ज्ञाप्यते द्वितीय-मन्त्रे । तेन, कारणज्ञानस्य मोक्षहेतुत्वात् जन्मस्थेमध्वसकारणानाञ्च त्रित्वात् त्रयोऽपि मोक्षप्रदा इति मतिर्व्युदस्यते । एको हि रुद्र इति । नात्र एकोद्देशेन रुद्रत्वविधि न द्वितीयाय तस्थुरिति अनेकत्व

यो देवो अग्नौ यो अप्सु यो विश्वं भुवनमाविवेश ।
य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो नमः ॥ १७ ॥

इति श्वेताश्वतरोपनिषदि द्वितीयोऽध्यायः ॥

—:※※:—

॥ अथ तृतीयोऽध्यायः ॥

य एको जालवानीशत ईशनीभिः सर्वान् लोकानीशत ईशनीभिः ।

अन्तर्यामितया सर्वात्मत्वम्; न तु स्वरूपेणेत्येतत् प्रदर्शयति यो देव इति । स्पष्टोऽर्थः ॥ (१७)

॥ इति द्वितीयाध्यायप्रकाशिका ॥

—:-:—

उक्तज्ञानस्य फलमाह **य एक** इति । 'अपहतपाप्मा दिव्यो देवः' इति देवत्वेन श्रुतिप्रसिद्धः परमात्मा प्रकृतिशब्दितमायारूपवागुरा-युक्तस्सन् ईशनसमर्थाभिः ज्ञानबलक्रियाशक्तिभिः मायाजालगोचरान् प्राकृतांश्च (न्) लोकान् ईष्टे तदगोचरान् अप्राकृतांश्च लोकान् ईष्टे ।

तत्र जीवपरम्; प्रतीच्य आत्मा प्रत्यगात्मेति आत्मपदं परं परमात्मपरमिति; सर्वार्थसिद्धौ जीवसरे(७)तत्प्रत्यक्पदग्रहणात् । इह तु प्रत्यगिति परमात्मपरमेवेति । वस्तुतो जीवं प्रति परस्य मुख्यप्रत्यक्त्वस्य दुर्वचत्वेऽपि अहमितिभासमानत्वरूपसामान्याकारेण तद्विवक्षेह शरीरात्मभावव्यञ्जनायाऽऽदृता श्रुताविति न कश्चिद् दोष इति । प्रत्यगित्यस्य, एवं सर्वप्रत्यक्छरीरक' इत्येवार्थवर्णनसंभवेऽपि ज्ञानिभिः परमात्मा अहमित्येव गृह्यत इति विशेषव्युत्पादनायैतद्विवक्षेति ॥

इति द्वितीयाध्याय भाष्यपरिष्कारः ।

य एवैक उद्भवे संभवे च य एतद्विदुरमृतास्ते भवन्ति ॥ १ ॥
एको हि रुद्रो न द्वितीयाय तस्थु य इमान् लोकानीशत ईशनीभि ।

यश्च जगत **उद्भवे** उत्पत्तौ, **संभवे** —समित्येकीकारे—तथापरपर्याये एकीभावे च [य] ईष्टे, तज्ज्ञान मोक्षसाधनमित्यर्थ । (१)

ननु 'य एतद्विदुरमृतास्ते भवन्ति' इति पूर्वमन्त्रे सर्वलोकेश-नारायणज्ञानस्यैव मोक्षसाधनत्वमिति (नारायणस्यैव मोक्षसाधनज्ञान-विषयतया मोचकत्वमिति) यदुक्तम्, तदयुक्तम् । जगत्कारणत्वेन प्रसिद्धाना ज्ञानस्यैव मोक्षसाधनत्वमिति वक्तुमुचितत्वादित्याशङ्क्याह **एको** हीति । हे जना ! 'सर्वलोकानीशत ईशनीभि,' 'प्रत्यक् तिष्ठति' इति विर्दिष्ट **विश्वा भुवनानि ससृज्य** सृष्ट्वा अन्तकाले **सञ्चुकोच** संहृतवान्, **गोपाः** गोप्ता रक्षिता च य, स एक एव **रुद्रः**— संसाररुज द्राव(द्रव) यतीति रुद्र —संसारमोचक इत्यर्थ । **द्वितीयाय** द्वितीयत्वाय सहायतया न केऽपि **तस्थुः** । सहायतया वा उपाया-

एवमष्टाङ्गेन योगेन आत्मतत्त्वसाक्षात्कारपूर्वक ब्रह्मतत्त्व-साक्षात्कारसपादनप्रकारो दर्शित । अथ तृतीये तस्येश्वरस्यैव मोक्षप्रदत्व प्रतिपाद्यते। एत विदुरिति वक्तव्ये, एतद्विदुरिति नपुसक-प्रयोगात् उद्भवसभवनियमनकर्तुरैक्यप्रज्ञापने नैर्भर्य व्यज्यते । एत-दित्यस्य ऐक्यमित्यर्थ । (१)

नियमनरूपस्थितिकर्तु उद्भवकर्तु प्रलयकर्तुश्च प्रत्येकमैक्य वेदनीय-तयोक्तमिति न मन्तव्यम् कि तु सर्वकर्तुरैक्यमिति ज्ञाप्यते द्वितीय-मन्त्रे। तेन, कारणज्ञानस्य मोक्षहेतुत्वात् जन्मस्थेमलयसंहरणानाञ्च भिन्नात् त्रयोऽपि मोक्षप्रदा इति मतिर्व्युदस्यते। एको हि रुद्र इति। नात्र एकोद्देशेन रुद्रत्वविधि न द्वितीया —इति अनेकत्व-

प्रत्यङ् जनास्तिष्ठति सञ्चुकोचान्तकाले संसृज्य विश्वा भुवनानि
गोपाः ॥ २ ॥

न्तरतया वा केऽपि न स्थितवन्तः। मोचकोऽन्यः कोऽपि नास्ति। 'वेदाहमेतं पुरुषं महान्तम्' इति महापुरुषं प्रस्तुत्य, 'तमेवं विद्वानमृत इह भवति ; नान्यः पन्था विद्यते' इति मार्गान्तरनिषेधात्। अत्र रुद्रशब्दो [यौगिकः ?] ; रूढ्यर्थापेक्षया प्रकृतौपयिकस्य मानान्तराविरुद्धस्य संसारमोचकत्वलक्षणयौगिकार्थस्य मनसि विपरिवर्तमानस्य शारीरकापशूद्रन्यायेन बलवत्त्वात्। अस्याश्चोपनिषदो भगवत्परत्वस्य साधयिष्यमाणत्वाच्च नात्र चोद्यावकाशः। (२)

पक्षव्युदसनेन एकत्वविधानपरत्वस्य स्पष्टत्वात्। अतो रुद्रपदमुद्देश्यसमर्पकम्। उद्देश्यश्च प्रकृत एव भवति। न च रुद्राख्यदेवताविशेषः प्राक् कण्ठोक्तः। अतो रुद्रपदेन, पूर्वोक्तो य आकारः, तद्विशिष्टो वाच्यः। तत्र पूर्वमन्त्रोक्तेष्वाकारेषु ईशितृत्वोद्भवसंभवहेतुत्वानामत्र द्वितीयादिपादैरनूद्यमानतया, 'य एतद्विदुरमृतास्ते भवन्ति' इत्युक्तो मोक्षप्रदत्वाकार एव शिष्यते। रुद्रशब्दश्च तत्प्रतिपादनौपयिकयोगशक्तिसंपन्न इति स एवार्थो ग्राह्य इत्याशयेनाह संसाररुजमित्यादि। प्रत्यङ् यथावस्थितस्वस्वरूपसाक्षात्कारवान् तिष्ठतीत्यर्थेन मायावश्यत्वाभावद्योतकत्वादिना ज्ञात्वानित्येतदनुवादत्वमपि संभवेत्। संचुकोचेति अणिजन्तप्रयोगेण स्वयं तस्य संकोचरूपलयाश्रयत्वावगमनात् ब्रह्मण उपादानत्वं दर्शितं भवति। भुवनानीत्यस्य संसृज्येत्यत्रेव अत्राप्यन्वये तु संहृतवानिति णिजर्थो ग्राह्यः। गोपाः इति च सृष्टिस्थितिलयानां सर्वेषां चेतनगोप्तृत्वरूपताज्ञापनार्थम्। तत् स्पष्टं दयाशतके। तदनेन मन्त्रेण सृष्टिस्थितिप्रलयकर्तुः मोक्षप्रदत्वैकत्वमुक्तम्। शारीरकापशूद्रेति। तत्र हि शूद्रशब्दस्य यौगिकत्वं प्रकरणादादृतम्। २

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः ॥ ३ ॥
यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः ।
हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु ॥ ४ ॥

विश्वत इति । 'अनेकबाहूदरवक्त्रनेत्रम्' इत्युक्तरीत्या अनन्त नयनाननपाणिपादादियुक्तनित्य [निरवद्य ?] दिव्यविग्रहयुक्त असहाय एव द्युपृथिव्यादिसर्वप्रपञ्च [वि] निर्माता जीव न् बाहुभ्यां पतत्रशब्दितैः पद्भिश्च संनं (संध)मति-सयोजयति । करणकलेबरसंयोग करोतीत्यर्थ । सर्वेषां शरीरेन्द्रियसबन्ध कुर्वन् स्वयमनन्याधीनानन्तशरीरेन्द्रियवानित्यर्थ ।

परमात्मोपलब्धिप्रार्थनामन्त्रमाह यो देवानामिति । 'यान्येतानि देवत्रा क्षत्राणि, इन्द्रो वरुण सोमो रुद्र पर्जन्यो यमो मृत्युरीशान ' इति बृहदारण्यकोक्तरीत्या इन्द्रवरुणरुद्रादीनामुद्भव ।

ननु महीमहीधरमहार्णवादीनां स्वर्गनरकाद्यनन्तलोकानाञ्च सृष्टिकर्ताऽप्येक इति दुरभ्युपगमनम् , अल्पेऽपि कार्येऽनेकपुरुषसाहाय्यकसव्यपेक्षताया एव सर्वत्र दृष्टे । एवसति का कथा सर्वेषां सृष्टौ स्थितौ सहारे चैक कर्तेति इति शङ्काम्, एकस्यैव सर्वसृष्टिकार्यर्थिपरिकरसंपत्तिप्रदर्शनेन परिहर्तुं विश्वत इति मन्त्र । बाहुभ्यां सयोजयतीति देवमनुष्यादिसृष्टिरुच्यते पद्भि संयोजयतीति तिर्यक्सृष्टि । एवञ्च वाक्यद्वित्वात् क्रियापदावृत्तिरस्तीति ज्ञापनाय समित्युपसर्गस्य द्वि प्रयोग । अथवा द्वितीय समिति जनयन् इत्यनेन संबध्यते । तैत्तिरीयनारायणेऽपि एतदर्थो द्रष्टव्य ।

एव तावत् सर्वकारणस्यैकत्व प्रतिबोध्य तस्य मोक्षप्रदत्वमुक्तम् । अथ मोक्षहेतुबुद्धिप्रदत्वमपि तस्यैवेति प्रार्थनामन्त्रमुखेन

उद्भवत्यस्मादित्युद्भवः । प्रकर्षेण भवत्यस्मादिति प्रभवः । प्रकर्षेण देवाधिपतित्वादिरूपेणास्य भवनं प्रभवनम् । 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इति कर्मफलदायित्वलक्षणप्रभुत्वस्य भगवद्धर्मत्वेन प्रजापतिपशुपतित्वादिपदप्रापकत्वलक्षणस्य प्रभवनस्य भगवदधीनत्वात् इति द्रष्टव्यम् । विश्वाधिकः । 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इत्युक्तरीत्या विश्वस्य सर्वस्यापि तदेकदेशैकदेशतया तस्य विश्वाधिकत्वम् । संसाररुजा द्रावकतया रुद्रत्वम्, निरतिशयसार्वज्ञ्यादि युक्ततया महर्षित्वञ्च भगवतो युज्यते । एवम्भूतो भगवान्, 'यन्नाभिपद्मादभवन्महात्मा प्रजापतिर्विश्वसृड्विश्वरूपः', 'तत्र ब्रह्मा चतुर्मुखोऽजायत', 'नारायणाद्ब्रह्माजायत' इत्युक्तरीत्या हिरण्यगर्भं सर्वेषां देवानां सृष्टेः प्राक् जनयामास । स देवः परमात्मविषयतया शुभया बुद्ध्या योजयत्वित्यर्थः । (४)

ज्ञाप्यते । सर्वकर्तुरेकत्वस्य प्रागवेदनात् सृष्टिमात्रकर्तृतया प्रसिद्धस्य हिरण्यगर्भस्य सर्वकर्तृभेदायोगात्, हिरण्यगर्भं जनयित्वा तन्मुखेन देवानां जनकत्वात् सर्वकर्तृत्वमित्येव वक्तव्यमिति हिरण्यगर्भजनकत्वमप्याक्षिप्तमधस्तात् । एवं देवप्रभवत्वेन हिरण्यगर्भजनकत्वेन मोक्षप्रदत्वादिना च विशिष्टम्, अत एव विश्वाधिक य इत्यादिनाऽनूद्य, तस्य शुभधीसम्पादकत्वमुच्यते । अत इहापि रुद्रपदमुद्देश्यकोटिनिविष्टत्वात् न रुद्रदेवतात्वविधायकम् किं तु पूर्वोक्तार्थकं सत् हिरण्यगर्भजनकत्वेन प्रमाणान्तरप्रसिद्धदेवतापरम् । प्रकर्षेण भवतीति । भवनमिदं देवानाम् । भगवद्गतं तु प्रभवनमन्यदित्याह प्रकर्षेणेति । प्रभवनस्य भगवदधीनत्वमिति । फलप्रदत्वरूपप्रभवनस्य तत्क्रियारूपतया तदिच्छाजन्यतया तदधीनत्वम् । यद्वा पदप्रापकत्वेत्यस्य पदप्राप्त्येत्यर्थः । इदं प्रभवनं तत्तद्देवगम् । (४)

या ते रुद्र ! शिवा तनूरघोरा पापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥ ५ ॥
यामिषु गिरिशन्त हस्ते ' बिभर्ष्यस्तवे ।
शिवां गिरित्र ! तां कुरु मा हिंसीः पुरुषं जगत् ॥ ६ ॥

'अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे । तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥' इत्युक्तरीत्या सौम्यदिव्य मङ्गलविग्रहविशिष्टतया भगवत्प्रकाशप्रार्थनामन्त्रमाह **या ते रुद्रेति**। हे रुद्र संसाररुग्द्रावक ! प्रसिद्धरुद्रव्यावर्तनाय तं विशिनष्टि **गिरिशन्तेति** । गिरिशं तनोतीति गिरिशन्तः । रुद्रस्य स्रष्टेत्यर्थः [तत्र सम्बुद्धिः ?] । या शिवा अघोरा च **पापकाशिनी** पापकमशितुं शीलमस्याः इति पापकाशिनी-पापदाहिका वैष्णवी सात्त्विकी तनुः, तादृश्या **शन्तमया** सुखप्रदया अत्यन्तानुकूलया तन्वा विग्रहेण **अभिचाकशीहि** प्रकाशस्वेत्यर्थः।

यामिषुमिति । गिरित्र । गीः वेदान्तः । तत्र त्रायते पाल्यते प्रतिपाद्यते इति वेदान्तप्रतिपाद्यत्वं **गिरित्र**शब्दार्थः । ***गिरिशन्ते***त्यस्य पूर्ववदर्थः। हे गिरित्र ! गिरिशन्त ! ते हस्ते शिवां **यामिषुं बिभर्षि**-यत् आयुधं बिभर्षीत्यर्थः । तामिषुम् **अस्तवे**— असु क्षेपे— मद्भ्रज्ञानविरोधिक्षेपाय कुरु । गच्छतीति जगत्-संसारपथचङ्क्रम्यमाण

मोक्षहेतुभूता बुद्धिः शुभैव शुभाश्रयविग्रहविषयिणीमि प्रार्थ्यते या ते इति मन्त्रेण । (५)

दिव्यमङ्गलविग्रहस्येव दिव्यायुधादेरपि ध्येयत्वम्, तेन ध्यायिना दण्डनपरिहारेण परिपालनस्य कार्यत्वप्रार्थनामुखेन प्रार्थ्यते यामिषुमिति । 'अस्तवे यां बिभर्षि, तां शिवां कुरु' इत्यन्वयेऽपि न

तत पर ब्रह्म पर बृहन्त यथानिकाय सर्वभूतेषु गूढम् ।
विश्वस्यैक परिवेष्टितारमीश त ज्ञात्वा अमृता भवन्ति ॥ ७ ॥
वेदाहमेत पुरुष महान्तमादित्यवर्ण तमस परस्तात् ।
तमेव विदित्वाऽति मृत्युमेति नान्य पन्था विद्यतेऽयनाय ॥ ८ ॥

पुरुष मा हिंसीः ससारान्धकूपपतित मा कार्षीरित्यर्थ । (६)

ततः परमिति । उक्तप्रकारेण तत्प्रार्थनानन्तरम् बृहन्त निरतिशयबृहत्त्वाश्रयम्, अत एव परम्, **यथानिकाय** मशकमातङ्गादिशरीरानुरूप्येण सर्वभूतेषु अनुप्रविश्य अन्तर्यामितया वर्तमानम्, विश्वस्याप्य स्थित तमीश्वर ज्ञात्वा मुक्ता भवन्तीत्यर्थ । (७)

तज्ज्ञानस्य मोक्षसाधनत्वमुक्त्वा इतरस्य तन्निषेधति **वेदाहमेत** मिति । प्रकृते परस्तात् ज्योति महापुरुष (ज्योतिर्मयवपुष ?) तमेव पुरुष विदित्वा मृत्युशब्दित ससारमतिक्रामति । **अयनाय** तत्प्राप्तये अन्यो मार्गो नास्ति । एतमर्थमह वेद जानामि । असिन्नर्थे विवादो नास्तीति मुनीना परस्पर वचनमिदम् । (८)

दोष । अपा पत्यु शत्रून् राम इव, श्रिताहिंसनेन तद्विरोधिन क्षिपेति यावत् । (६)

एव प्रार्थनाया सत्या मोक्षार्थध्यान सपद्यत इति ज्ञाप्यते तत इति । गूढमिति अन्तर्व्याप्तिरुक्ता । परिवेष्टितारमिति बहिर्व्याप्ति । तत परमित्यस्य पूर्वश्लोकोक्तात् जगत परमित्यर्थ शाङ्करभाष्ये ॥ ७

एव ध्येयत्वेन कथित पर ब्रह्म कि किञ्चिद्देवतारूपम्, उतान्यादृशम् आद्ये का सा देवतेत्यत्राह वेदेति । एतम् एतावत् ध्येयत्वेनोक्तम् अह तम पारवर्त्यादित्यवर्णमहापुरुषत्वेन वेदेत्यर्थ । पुरुषसूक्तानुवादोऽयमिति स्पष्टम् । तत्र च पुरुष, 'ह्रीश्च ते लक्ष्मीश्च

नन्वात्मज्ञानस्यैव, 'तरति शोकमात्मवित्' इति मोक्षहेतुत्व मुच्यते । कथमादित्यवर्णविग्रहपुरुषज्ञानस्येत्याशङ्क्य, अत्रैव पुरुषस्य

पत्न्यौ' इति लक्ष्मीपतित्वेन वेदित । पुरुषशब्दश्च तस्मिन्नेव प्रसिद्ध । तथा च स्कान्दे, 'यथा पुरुषशब्दोऽय वासुदेवे प्रतिष्ठित । तथा शङ्करशब्दोऽय महादेवे प्रतिष्ठित ॥' इति । मुनीना परस्परमिति एतदध्यायान्तिममन्त्रानुसारेणोक्तम् । एव सृष्टिस्थितिसहारकारिणा ब्रह्मविष्णुरुद्राणा मध्ये विष्णो लक्ष्मीपते पुरुषशब्दार्थस्यैव पर ब्रह्मत्व प्रतिबोध्य, 'चतुर्मुख एव वा रुद्र एव वा तुल्यनयेन पर ब्रह्म भवतु, त्रितयोत्तीर्णमन्यद् वा त्रितयहेतु । तथा च तस्यैवास्य कारणस्य ध्यानादस्तु मुक्ति' इत्याक्षेप क्षिपति तमेवेति । विष्णु-परब्रह्मणोरेवैक्यम्, नान्यथा । अत चेतनान्तर सर्वकारण न मन्तव्यम्, नापि मुक्तिप्रदम् । अतो वासुदेव एव परदेवतेति । अत्र तमेवेति तच्छब्दोपर्यैव एवकारश्रवणात् विदित्वैवेत्यश्रवणात् स एव पन्था नान्यश्चेतन इत्येव प्रतीयते । उक्तञ्चेद निक्षेपरक्षायाम् । 'महापुरुषस्य वेदनमेव मोक्षसाधनम्' इति पराधिकरणभाष्यमप्यत एव महापुरुषस्यैव वेदनमित्येतदर्थपर्यवसायीति सुवचम् । पूर्वापर भाष्यसन्दर्भ टीका च तदैव सगच्छते । तावता वेदनातिरिक्तस्या नुपायत्वासिद्धिरिति तु न 'तमेव विद्वान् अमृत ' इति एवकार-रहितपुरुषसूक्तवाक्ये तद्विलक्षणसभवात् । उभयोरेकार्थ्यौचित्येऽपि, 'स एनमविदितो न भुनक्ति' (१ ४) इति बृहदारण्यकवाक्यादित तत्सिद्धे । एवमपि अत्र तज्ज्ञानस्य मोक्षसाधनत्वमुक्त्वा इतरस्य तत् निषेधतीत्यवतरणभाष्यमपि तदभिप्रायमेव ग्राह्यम् । यद्वा प्रकृतश्रुतावपि वेदनविषय विशिष्टमहापुरुषान्यस्य पथित्वनिषेधे प्रकृतपुरुषव्यतिरिक्तस्यानुपाय वदन् वेदनातिरिक्तविशिष्टतया महा पुरुषस्याप्यनुपायत्वावगमात् महापुरुषवेदनान्यस्यानुपायत्वसिद्धिर पीत्याशय इति । (८)

यस्मात् परं नापरमस्ति किञ्चित् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ ९ ॥

व्यापकत्वादात्मत्वमपि तस्यैवेत्याह—**यस्मादिति** । "तथान्यप्रतिषेधात्" इति सूत्रे, "यस्मादपरं परं नास्ति केनापि प्रकारेण उत्कृष्टं नास्तीत्यर्थः" इति भाषितम् । व्यासार्यैश्च, "यस्मादित्यस्य परमित्यनेनान्वयोऽस्तु । यस्मादुत्कृष्टं नास्तीत्यर्थः" इत्याशङ्क्य, "तथा सति अपरमित्यस्य वैयर्थ्यप्रसङ्गात् । न च परञ्चापरञ्च नास्तीति उत्कृष्टापकृष्टवस्तुनिषेधकत्वं शक्यशङ्कम्—नञ आवृत्तिप्रसङ्गात् । अतो यस्मादित्यस्य अपरमित्यनेनैवान्वयः । यस्मादन्यत् सर्वोत्कृष्टं नास्तीत्यर्थाश्रयणे तदन्यस्योत्कृष्टस्य वस्तुन एवाभावात् समाभ्यधिकनिषेधः फलति" इति वर्णितम्। यदपेक्षया अतिशयेनान्तःप्रवेशयोग्यं वस्तु नास्ति, यस्माच्चाधिकं विवृद्धं किमपि वस्तु नास्ति, यश्चाप्राकृते लोके अवाप्तसमस्तकामतया ब्रह्मादिकमपि तृणीकृत्य वृक्ष इवाप्रणतस्वभावस्तिष्ठति, तेन, 'भगवानिति शब्दोऽयं

ननु तमःपारवर्तिन आदित्यवर्णविग्रहावच्छिन्नस्य पुरुषस्य तमोतन्तर्गतविश्वात्मकचिदचिद्विशिष्टत्वायोगात् तस्य पूर्वोक्तब्रह्मभिन्नस्य देशविशेषस्थायि-परिच्छिन्नव्यक्तिविशेषस्योपासनादमृतत्वमिति कथमित्यत्र, पूर्वं महान्तमिति पदवेदितस्यातिसूक्ष्मत्वसर्वव्यापित्वे प्रदर्श्य, तदतिरिक्तं पूर्वोक्तं ब्रह्मेति मतिरपाक्रियते यस्मादिति । प्रपञ्चकारणस्य मोक्षस्थानाधिपतेश्चैकत्वे हि कारणस्य मोक्षप्रदत्वं सुस्थम् । अतः स एवायमिति भावः । पूर्णं पुरुषेण सर्वमिति पुरुषशब्दव्युत्पत्तिरपि दर्शिता । आदित्यवर्णविग्रहरूपपुरुषाकारत्वमपि तस्यैव । 'पूस्संज्ञे तु पुरे तस्मिन् शयनात् पुरुषो हरिः' इति सर्वव्यष्टिशरीरनिविष्टतया, 'स यत् पूर्वोऽस्मात् सर्वस्मात्, सर्वान्

ततो यदुत्तरतरं तद्रूपमनामयम् ।
य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्ति ॥ १० ॥

तथा पुरुष इत्यपि । निरुपाधी च वर्तते वासुदेवे सनातने' इत्युक्तप्रकारेण पुरुषशब्दितेन भगवता वासुदेवेनेद सर्वं व्याप्तमित्यर्थः । अनेन, 'जीवाम केन' इति चिन्ताया निस्तारो दर्शित । पूर्णमिति व्याप्त्या आत्मत्वे कथिते, देहभूतस्य जीववर्गस्य तदधीनजीवनत्वमुक्त भवति ॥९

यस्माद्धेतो पुरुषापेक्षयोत्कृष्टं वा समं वा नास्ति । तस्मात् तदेव सर्वोत्तरं कर्मकृतरूपरहित तत्कृतामयशब्दिततदु खशून्यश्च । तज्ज्ञानमेव मोक्षसाधनमित्युपसहरति ततो यदिति । "तथाऽन्यप्रतिषेधात् " इति सूत्रे, 'ततो यदुत्तरतरमिति पूर्वनिर्दिष्टात् पुरुषात् अधिकं वस्तु न प्रतिपाद्यते, इत्युक्त्वा तर्हि, 'ततो यदुत्तरतरम्' इति किमुच्यत इति परिचोद्य, "पूर्वत्र; 'वेदाहमेतं पुरुष महान्तमादित्यवर्णं तमस परस्तात् । तमेव विदित्वाऽति मृत्युमेति नान्य पन्था विद्यतेऽयनाय' इति परस्य ब्रह्मणो महापुरुषस्य वेदनमेवामृतत्वसाधनम् , नाऽन्योऽमृतत्वस्य पन्था इत्युपदिश्य, तदुपपादनाय, 'यस्मात् पर नापरमस्ति किञ्चित् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं

पाप्मन औषत् तस्मात् पुरुष ' इति सर्वपूर्ववर्तित्व-सर्वपाप्मप्रदाहकत्वरूपकारणत्वमोक्षप्रदत्वशालितया च पुरुषत्वमपि तस्यैवेति । मन्त्रोऽय मुण्डके, तैत्तिरीयेऽपि च । (९)

'ननु विग्रहपरिच्छिन्नत्वोक्त्या कर्मवेष्टितत्वावगमात् अन्य एव उपास्यः' इति शङ्काऽपि उक्तार्थपरिशीलने स्वय शाम्यतीति दर्शयन् निगमयति तत इति । एवं मोक्षस्थानस्थितस्यैव सर्वव्यापितायाः व्यु-

पुरुषेण सर्वम्' इति पुरुषस्य परत्वं तद्व्यतिरिक्तस्य परत्वासंभवञ्च प्रतिपाद्य, 'ततो यदुत्तरतरं तदरूपमनामयम् । य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्ति' इति पूर्वोक्तमर्थं हेतुतो निगमयति । यत् उत्तरतरं पुरुषतत्त्वम्, तदेवारूपमनामयं यत, ततो ये एतत् पुरुषतत्त्वं विदुः, त एवामृता भवन्ति; अथेतरे दुःखमेवापियन्तीति' इति भावितम् । अत्र ततश्शब्दः पूर्वोक्तहेतूपसंहारार्थः । न तु पूर्वप्रतिपादितपुरुषस्य प्रतिपिपादयिषितवस्त्वन्तरावधित्वप्रतिपादनपर इति द्रष्टव्यम् ।

केचिदाचार्याः, "तेनेदं पूर्णमिति पूर्ववाक्ये सर्वमिदमिति प्रथमान्तनिर्दिष्टतया प्रधानस्य जगत एव, ततो यदुत्तरतरमित्यत्र तच्छब्देन ग्रहणम्" इत्यूचुः । तदपि युक्तमिति वेदार्थसंग्रहव्याख्यानेऽप्युक्तम् ।

त्पादितत्वात् आदित्यवर्णत्ववर्णनेन कर्मकृतनिकर्षलेशस्याप्यभावस्य सुगमत्वात्, तत एव तदन्यस्य सर्वस्य कर्मकृतसामयशरीरपरिच्छिन्नताया अपि व्यञ्जनात्, यत् उत्तरत्वेन त्वदभिमतं ब्रह्मशिवादि, ततोऽप्युत्तरतरं तमःपारवर्ति तदरूपमनामयञ्च, अन्यत्तु सामयरूपमिति, तदुपासन एवामृतत्वम्; तदन्यस्य कर्मतन्त्रस्य दुःखमयस्योपासने तु दुःखप्राप्तिरेवेत्यर्थः। सिद्धः अरूपमनामयमित्यस्य, 'कर्मकृतदेहतत्कृतदुःखविरोधि; हेयप्रतिभटमित्यर्थः' इति पराधिकरणटीका। आमयस्यात्मसंबन्धित्वप्रसक्त्यभावात् इहाऽऽमयः दुःखमित्युक्तः । हेतुपरत्वे तत इत्यस्य पूर्वार्धेऽनन्वयादुत्तरार्धेऽन्वयः कृतः । एवं संदर्भानुसारात् तत इत्यस्य हेतुपरत्वं भाष्योक्तं सुस्थम् । अन्यदप्यप्रतिषिद्धमनुमतमाह केचिदिति । जगतः प्रथमान्तनिर्दिष्टत्वादव्यवहितत्वाच्च तच्छब्दस्य तत्परामर्शित्वस्य युक्तत्वं मेऽपीदुक्तम् उपपन्नमिति

सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवाँस्तस्मात् सर्वगतश्शिवः ॥ ११ ॥

ननु 'तेनेदं पूर्णं पुरुषेण सर्व'मिति सर्वशरीरसम्बन्धावगमात् तस्यापि हेयसंबन्धोऽवर्जनीय इत्याशङ्क्याह **सर्वाननेति**। सर्वशरीराणां तच्छरीरत्वेन सर्वाननशिरोग्रीवत्वम् ; सर्वभूतहृदयगुहाश्रयत्वात् सर्वभूतगुहाशयत्वम्। अनेनाऽऽकारेण सर्वव्याप्यपि यतो भगवान्, [तस्मात् ?] 'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः' इति हेयप्रतिभटत्ववाचिभगवच्छब्दार्थतया तस्य पुरुषस्य सर्वगतत्वेऽपि शिवत्वमेव, न त्वशुभसम्बन्ध इति भावः । (११)

तत्र स्वीकृतमिति । व्याख्यानेऽपीति अपिना हेतुपरमूलव्याख्यानपरैरपि (रेव) अस्यार्थस्योक्तत्वात् मूले इदं प्रतिषेध्यं न भवतीत्युपदर्श्यते। तदयमर्थः—उत्तरतरमित्यस्य अतिशयितोत्तरमित्यर्थात् जगदपेक्षयाऽतिशयितोत्तरत्वोक्त्या अनतिशयितमुत्तरं किञ्चिदस्तीत्यवगमनात्, ब्रह्मरुद्रादेरपि जगदन्तर्भूततया, तत उत्तरमित्यनेन, 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च' इति प्रसिद्धनित्यमुक्तग्रहणम्। अतिशयितमुत्तरं तु परं ब्रह्म, स उत्तमः पुरुष इति। (१०)

ननु विग्रहवतोऽनामयत्वमसंभवीत्याशङ्कायाम्, 'तस्य विग्रहस्येव विश्वस्यैव तच्छरीरत्वाविशेषात् तद्विग्रहानङ्गीकारेऽप्याशङ्का जागर्ति । एवञ्च तत्परिहार एवैतत्परिहारोऽपि। तत्र चैवं परिहार इत्युच्यते सर्वाननेति । सर्वेषामाननशिरोग्रीवादयः अस्याप्याननशिरोग्रीवादयो भवन्ति । तत्र हेतुः जीवात्मन इवास्यापि तत्तद्भूतगुहाशयत्वम्। न केवलमेतत्, सूक्ष्मतया कार्यकारणसर्वव्यापितया आननादिरहितस्थावरादिशरीरकत्वमप्यस्ति । एवञ्च, "एको

यस्यास्ति देहः, स भवति विविधानन्त दुःखैकभोक्ता ; विश्वं देहः प्रभोश्चेत्, स कथमतिपतेत् विश्वदुःखानुभूतिम्'' इत्यधिकरणसारावलिदर्शिता शङ्का उक्तमहापुरुषातिरिक्तपरब्रह्माङ्गीकारेऽपि भवत्येव। महापुरुषे त्वियं शङ्का न भवति। स हि भगवान्। भगवच्छब्दश्च हेयप्रतिभटे यौगिको रूढश्चेति विष्णुपुराणादौ व्यक्तम्,

'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः।',

'तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः' इति।

प्रसिद्धञ्च हेयप्रतिभटत्वमस्यान्तर्यामिश्रुतिषु, 'एष त आत्मा अन्तर्याम्यमृतः', 'एष आत्माऽपहतपाप्मा दिव्यो देव एको नारायणः' इति। दिव्य इति विग्रहवैशिष्ट्यं प्रदर्शयन्त्येव श्रुतिरियमपहतपाप्मत्वमुपदिशति। अत्राप्युक्तम्, 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः' इति। अतो नारायणाद् भगवतोऽतिरिक्तस्य सर्वदेहित्वे स दोषः स्यात्। अयं तु सर्वव्यापी भगवान्। अस्य तु सर्वगतत्वेऽपि शिवत्वमेव = मङ्गलत्वमेवेति। भगवच्छब्दो विष्णावेव मुख्य इति श्रीमतो रामायणादपि ज्ञायते। आह ह्युत्तरां दिशं प्रति प्रस्थाप्यमानान् प्लवङ्गमान् प्रति सोमगिरिदेशं प्रस्तुत्य सुग्रीवः, 'भगवानपि विश्वात्मा, शम्भुरेकादशात्मकः। ब्रह्मा वसति देवेशो ब्रह्मर्षिपरिवारितः' इति। एकादशात्मकशम्भु-देवेशब्रह्मोभयातिरिक्तस्तद्विलक्षणो हि विश्वात्मको भगवानिहोच्यते; अपिशब्देन च।

विष्णुपुराणेऽपि स्पष्टम्, 'एवमेष महाशब्दो मैत्रेय भगवानिति। परमब्रह्मभूतस्य वासुदेवस्य नान्यगः' इति। ईदृशं भगवत्त्वं विधाय तेन हेतुना शिवत्वं विधीयमानं मङ्गलत्वरूपमेव हि भवितुमर्हति। अत्र सर्वव्यापी स भगवान् शिव इत्येकवाक्यता तु न भवति। तस्मादिति वाक्यभेदकपदस्य मध्ये निविष्टत्वात्। सर्वगतशब्दस्य सर्वव्यापिशब्दसमानार्थतया पौनरुक्त्यप्रसङ्गाच्च। (११)

महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः ।
सुनिर्मलामिमां शान्तिमीशानो ज्योतिरव्ययः ॥ १२ ॥

तज्ज्ञानस्यैव मोक्षसाधनत्वमित्येतत् द्रढयति—**महानिति** । वैशब्दोऽवधारणे । पुरुष एव महान् **प्रभुः** फलप्रदानसमर्थः । 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इत्युक्तः (इत्यत्र ?) "प्रभुः= फलप्रदः" इति भगवता भाष्यकृता व्याख्यातत्वात् प्रकृते मोक्षरूपफलस्य प्रस्तुतत्वात् महच्छब्दसमभिव्याहाराच्च महाफलरूपमोक्षप्रदः स एवेति तस्य मोक्षहेतुत्वं पूर्वोक्तं स्थिरमिति भावः । तत्र हेतुमाह **सत्त्वस्यैष प्रवर्तक** इति । 'जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः' इत्युक्तरीत्या मोक्षार्थज्ञानहेतु-सत्त्वगुणोन्मेषहेतुभूतकटाक्षशालितया स एव मोक्षप्रद इत्यर्थः । अत एव ज्योतीरूपनिरतिशयदीप्तियुक्तादित्य[वर्णविग्रह ?] पुरुषोऽव्ययो भगवानेव **सुनिर्मलामिमां** मोक्षरूपां रागाद्युपद्रवशान्तिम् **ईशानः** ईष्ट इत्यर्थः ।

एवमस्य मोक्षप्रदत्वं मोक्षहेतुबुद्धिप्रदत्वञ्चोक्तम् । अथ तद्धेतु-सत्त्वप्रवर्तकत्वमप्युच्यते महानिति । शान्तिमित्यस्य क्रियासापेक्ष-तया ईशान इत्यत्रान्वयः ; पूर्वमपि, 'सर्वान् लोकानीशत' इति सकर्मकतया प्रयोगः स्थितः । अत्र शान्तिमीशान एष महान् प्रभुः सत्त्वस्य प्रवर्तक इत्येकवाक्यता वा ; उत्तरार्धं पृथग् जीव-न्मुक्तिहेतुत्वविधिरूपं वा ।

तमसः परस्तादादित्यवर्णः स्थितः स तथात्वेनैव ध्येय इति विभुस्वरूपध्यानवत् तदप्यशक्यमेवेति न शङ्कितव्यम् । न हि सलिलप्रवाहस्त्वयजलधिः सर्वेषामपि शरीरान्तरेव संनिविष्टस्तथोपा-

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः।
हृदा मनीषा मनसाऽभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥१३॥

तज्ज्ञानसाधनमाह अङ्गुष्ठमात्र इति। सर्वेषामन्तरात्माऽसौ हृदयगुहानिहितत्वनिबन्धनाङ्गुष्ठपरिमाणयुक्तः पुरुषः हृदा भक्त्या मनीषा धृत्या युक्तेन मनसा अभिक्लृप्तः प्राप्यः। हृन्मनीषाशब्दयोः भक्तिधृतिपरत्वम्, "सर्वत्र प्रसिद्धोपदेशात्" इत्यत्र व्यासार्यैर्वर्णितम्। शिष्टं स्पष्टम्।

सनेऽपि फलप्रद इति ज्ञाप्यते अङ्गुष्ठमात्र इति। इहेदं पदं प्रमिताधिकरणोक्तरीत्या परमात्मपरम्; पञ्चमे तु जीवपरम्; प्रकरणात्। जनानां हृदयस्याङ्गुष्ठपरिमाणतया तदवच्छिन्नस्य परमात्मस्वरूपस्य व्यापिनोऽपि अङ्गुष्ठमात्रत्वम्। एतदुपपादनायैव अन्तरात्मेत्यादि। अत्र जनानामित्यस्य अन्तरात्मेत्यत्राप्यपकर्षः। जनसंबन्ध्यन्तःकरणावच्छिन्नोऽयमात्मेति अङ्गुष्ठमात्र इत्यर्थः। सदा जनानां हृदये संनिविष्ट इत्यस्य पुनस्तदेकार्थकत्वे पौनरुक्त्यात् सर्वव्यापिपरमात्मस्वरूपस्य सदा हृदयनिविष्टतया असंदिग्धतया सदेतिकथनवैयर्थ्याच्च हार्ददिव्यमङ्गलविग्रहविशिष्टतया सदा स्थितिं दर्शयितुं द्वितीयः पादः। सदेत्यनेन दिव्यमङ्गलविग्रहस्य उपासनकाले परम् आविर्भाव इति न मन्तव्यम्, किन्तु सर्वदा स्थितिरिति ज्ञाप्यते इत्येकोऽर्थः संभवति। अन्यस्तु अयं बद्धावस्थायां न देहत्यागावस्थायामेवान्तरात्मेति न, किन्तु सदैवान्तरात्मा, एवम्भूतस्य जनहृदयसंनिविष्टस्वरूपस्य हृदयावच्छिन्नत्वप्रयुक्तमङ्गुष्ठमात्रत्वमिति। अयं द्वितीयपक्षार्थ इह भाष्येऽभिप्रेतः। व्यासार्यैरिति। वेदार्थसंग्रहे भाष्यकृद्दर्शितम्, "भक्त्या च धृत्या च समाहितात्मा" इति प्रस्तावस्यतात्पर्यं स्मृतिवाक्यमनुसन्धेयम्। (१३)

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठत् दशाङ्गुलम् ॥ १४ ॥
पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ १५ ॥

अङ्गुष्ठमात्रशब्दश्रवणकृतपरिच्छेदभ्रान्तिं व्युदस्यति **सहस्रेति** । अनन्तशिरोनयनादिदिव्यविग्रहयुक्तविराड्रूपी सन्,—दशाङ्गुलशब्देनावयवो लक्ष्यते । **भूमि**शब्देन ब्रह्माण्डम् —पञ्चभूतपञ्चतन्मात्रारूपदशावयवयुक्तब्रह्माण्डमतिक्रम्य परमपदे स्थित इत्यर्थः । (१४)

यस्मात् पुरुषेण व्याप्तमिदं सर्वम्, अत भूतभव्योपलक्षितं प्रपञ्चजातं पुरुषात्मकमेवेत्याह **पुरुष एवेति** । [उक्तोऽर्थः ।] **उतामृतेति** । अत्र अमृतत्वशब्देन मुक्तिवाचिना मुक्तिस्थानं लक्ष्यते । अप्राकृतभोग्यभोगोपकरणसमृद्धं यदमृतत्वं परमपदम् अन्ने प्रकृतिप्राकृत-

---

सहस्रशीर्षेत्यादेः, सर्वज्ञत्वात् सर्वशक्तित्वाच्च सर्वत्र शिरश्चक्षुःपादकार्यकरणसमर्थ इत्येतावन्मात्रपरत्वमपि सुबालोपनिषद्व्याख्यानादौ दृष्टम्—अथापि श्रीगीताविश्वरूपाध्याय इव वास्तवानेकशीर्षत्वादेरेव सुवचत्वात् यथाश्रुतमेवार्थमाह दिव्यविग्रहयुक्तविराड्रूपीति । दशाङ्गुलशब्दार्थसमीक्षणं पुरुषसूक्तव्याख्याने द्रष्टव्यम् ॥

अत्यतिष्ठदित्यत्र न भूतकालविवक्षा, सार्वकालिकसर्वपदार्थव्याप्तेरेव विवक्षितत्वादिति विवरीतुम्, अतिक्रम्य स्थितिरियं कुत्रेत्यत्र, परमपदे इति स्पष्टयितुञ्च पठ्यते पुरुष एवेति । भव्यशब्दः, 'भव्यगेये'त्यादिना भवतीति कर्तर्येव निपातितः। तेन वर्तमानग्रहणम् । 'भूतं भव्यायोपदिश्यत' इत्यादिस्थल इव साध्यरूपार्थविवक्षया भविष्यदर्थकश्च । तेन कालत्रयवर्तिसर्वग्रहणसिद्धिः । अन्नशब्देन प्रा-

सर्वतःपाणिपादं तत् सर्वतोक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १६ ॥

सनन्धे **नातिरोहति** नोत्पद्यते, तस्याप्यमृतत्वस्यासौ ईशान इत्यर्थः । अतश्चोभयविभूतिनायकत्वमुक्तं भवति । (१५)

सर्वत इति । सर्वतः पाणिपादादिकार्यकारि तत्तत्कार्यमुखेन सर्वमावृत्य तिष्ठतीत्यर्थः । **गीताभाष्ये च**, 'सर्वतः पाणिपादं तत्' इति श्लोकव्याख्यानसमये, "परस्य ब्रह्मणोऽपाणिपादस्यापि सर्वतः पाणिपादादिकार्यकर्तृत्वं श्रूयते । प्रत्यगात्मनोऽपि परिशुद्धस्य तत्साम्यापत्त्या सर्वतः पाणिपादादिकार्यकर्तृत्वं श्रुतिसिद्धमेव, 'निरञ्जनः परमं साम्यमुपैती'ति हि श्रूयते—" इति भाषितम् । (१६)

कृतपदार्थं भोग्यताबुद्धिस्थितिपर्यन्तममृतत्वस्य दौर्लभ्यं दर्शितम् ॥१५

कार्यकरणाय शरीराद्यपेक्षाऽपि नेत्युच्यते सर्वत इति । इति भाषितमिति । ननु जीवस्य विराड्रूपतुल्यरूपशालित्वे प्रमाणाभावात् तद्विषये तत्कार्यकर्तृत्वपरतया गीताभाष्ये व्याख्यानेऽपि परमात्मनः साक्षात् तादृशविग्रहवत्त्वस्यैव संभवात् किमिति क्लिष्टं व्याख्येयमिति चेत्—उच्यते—पाण्यादिदेशे पादाद्यसंभवेन सर्वतःपाणिपादत्वादिवर्णनमपि क्लिष्टमेव । वस्तुतः पूर्वमप्येव, विश्वतश्चक्षुरिति मन्त्रेण तस्यार्थस्योक्तत्वात् पौनरुक्त्यं मा भूदिति अर्थान्तरं विवक्षता तत्र भगवद्भाष्यकारसंमतिरपि दर्शितेति ध्येयम् । एतत्पौनरुक्त्याय च तत्र तदर्थवर्णनम् । ननु स एवार्थ इह वर्ण्यताम्, अयमर्थश्च तत्र । अस्तु वा मम । किं तेन? वस्तुत इह सर्वेन्द्रियविवर्जितमिति पदं श्रूयमाणं पाणिपाद्याद्यभावं बोधयन् पाणिपादादिकार्यकृत्त्वरूपमर्थमिह विवक्षितं दर्शयति । उपरि च अपाणिपाद इत्यादिरनुवादः । (१६)

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत् ॥ १७ ॥
नवद्वारे पुरे देही हंसो लेलायते बहिः ।

सर्वेन्द्रियेति । **सर्वेन्द्रियगुणैः** सर्वेन्द्रियजन्यज्ञानैराभासः प्रकाशो यस्य तत् तथोक्तम् । इन्द्रियवृत्त्या विज्ञातुं समर्थमित्यर्थः । सर्वेन्द्रियवत्त्वमप्यैच्छिकमेव, न स्वाभाविकमित्याह **सर्वेन्द्रियविवर्जितमिति** । **सर्वस्य प्रभुमिति** । प्रभुत्वं सेवाफलप्रदत्वेन, ईशानत्वं नियन्तृत्वेनेति द्रष्टव्यम् । 'निवासः शरणं सुहृद्गतिर्नारायणः' इति श्रुतेः निरवधिकवात्सल्यशालि प्राप्यश्चेत्यर्थः । अत्रेशानशब्दस्य नपुंसकलिङ्गत्वान्न देवताविशेषप्रत्यायकत्वशङ्कावकाश इति व्यासार्यैर्वर्णितम् । (१७)

ननु सर्वत्र पाणिपादत्वादिकं गीतासु परिशुद्धात्मस्वरूपे प्रसिद्धम् । ततश्च परिशुद्धस्वरूपस्यैव सर्वप्रभुत्वेशानत्वादिकमवगम्यत इति शिष्यशङ्कां शमयति **नवद्वार इति** । मलप्रस्रवणद्वारतया हेयैर्नवभि

आभासः प्रकाश इति । बाह्यविषयग्रहणमित्यर्थः । नपुंसकलिङ्गत्वादिति । ईशानशब्दस्य शानजन्ततया त्रिलिङ्गत्वात् तिष्ठतीति श्रूयमाणक्रियान्वयाय नपुंसकत्वमेष्टव्यमिति भावः । न च प्रभुमिति द्वितीयान्तान्वयाय क्रियान्तरमध्याहार्यमिति इहापि द्वितीयान्तत्वं कल्पनाऽस्त्विति शङ्क्यम्—क्रियान्तराध्याहारः, वाक्यभेदकल्पना, सुहृच्छब्दे द्वितीयान्तत्वकल्पनेत्याद्यनेकदोषापत्तेः । प्रभुमित्यत्र प्रथमान्तत्वकल्पनस्यैव युक्तत्वात् । एवंरूपदेवताविशेषे अनेकानां सर्वेषां विशेषणानामनन्वयाद्याकाशादिन्याय एव । (१७)

एवमनेकपाणिपादादिमत्त्वेऽपि नास्य जीवत्वसाम्यम् । बन्धस्वरूपयोग्यताया अभावादिति शाम्यति नवद्वार इति । (१८)

वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च ॥ १८ ॥
अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥ १९
अणोरणीयान् महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् ॥ २० ॥

द्वारैर्युक्ते पुरवत् स्वात्यन्तभिन्ने अहमित्यभिमन्यमानो नानादेहसञ्चरणजङ्घालतया हंसशब्दितो जीवो नानादेहेषूच्चावचयोनिषु लेलायते गतागतं कुर्वन् परतन्त्रतया बम्भ्रमीतीति । अतः तस्य सर्वप्रभुत्वे का प्रसक्तिः ? अतः ततः बहिः बाह्य एव स्थावरजङ्गमात्मकसर्वलोकसंसारतन्त्रवाहीत्यर्थः । (१८)

अपाणीति । पाणिपादाद्यभावेऽपि तत्कार्यकारी इतरावेद्यः स्वयं सर्वज्ञः यः, तमादिकारणं महापुरुषं वदन्तीत्यर्थः । (१९)

अणोरिति । सकलसूक्ष्मवस्त्वन्तःप्रवेशयोग्यसौक्ष्म्यवान् निरतिशयबृहत्त्वशाली एवम्भूतः अस्य जन्तोः प्राणिनो जीवस्य आत्मा प्रेरकस्सन् सर्वजीवस्य हृदयगुहायामास्ते । जन्तोरित्येतत् आत्मेत्यत्रापि च संबध्यते ; आकाङ्क्षासत्त्वात् । गुहायामितिनिर्दिष्टहृदयगुहायामपि

किञ्चिदाकारेण जीवसाम्यं प्रदर्श्य तादृशस्यापि अदृष्टत्वविशिष्टद्रष्टृत्वादिरूपोऽतिशय उच्यते अपाणीति । (१९)

एवं सहस्रशीर्षेत्यादिना प्रसक्ताशङ्कापरिहारमारब्धं समाप्य ततः प्राक्तनमन्त्रोक्तमुपसंह्रियते अणोरिति । 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' इति वक्ष्यमाणेन मुण्डकश्रुतेन च मन्त्रेणैकार्थ्यं युक्तमिति अत्र यदा तदेत्यध्याहारः । अन्यथा पुनः

वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वात् ।
जन्मनिरोधं प्रवदन्ति यस्य ब्रह्मवादिनो हि प्रवदन्ति नित्यम् ॥ २१ ॥

॥ इति श्वेताश्वतरोपनिषदि तृतीयोऽध्यायः ॥

—:-:—

संरभ्यते । तादृशम् अक्रतुं कर्मलेपशून्यं महामहिमशालिनमीशं यदा पश्यति, तदा धातुः धारकस्य परमात्मनः प्रसादात् वीतशोको भवति । 'प्रसीदत्यच्युतस्तस्मिन् प्रसन्ने क्लेशसंक्षयः' इति स्मृतेः । ततश्च ध्यान-साध्यपरमात्मप्रसादनिर्वर्त्यतया ज्ञाननिवर्त्यत्वेन (प्रसादनिवर्त्यं या ज्ञाना-निवर्त्यत्वेन ?) बन्धस्य मिथ्यात्वं प्रत्युक्तम् । (२०)

वेदाहमिति यस्य विभुत्वेन जन्माभावं प्रकर्षेण वदन्ति, तमजरं पुरातनं सर्वगत्वात् सर्वात्मानमहं वेद जाने इत्येव ब्रह्मवादिनः नित्यं वदन्तीत्यर्थः ॥ (२१)

इति तृतीयाध्यायप्रकाशिका ।

वैराग्यात् वीतशोकादिको निरन्तरध्यानरतः तत्प्रसादात् दर्शनसमा-नाकारं ज्ञानं लभत इति अनध्याहारेण योजनाऽपि स्यात् । मन्त्रोऽयं कठवल्ल्यामपि । तत्र धातुरिति पाठभेदः । (२०)

एवं वेदाहमेतमिति मन्त्रान्तरेण संदर्भेण वक्तव्यमुक्त्वा तदर्थो निगम्यते वेदाहमिति । सर्वगतमिति हेतुगर्भविशेषणम् । विभुत्वादिति अपौनरुक्त्याय प्रभुत्वार्थकं सत् उत्तरार्धान्वयि ॥ (२१)

(अथ चतुर्थोऽध्यायः)

ब्रह्मवाचकशब्दानां जगद्वाचकशब्दैः सामानाधिकरण्येन व्यव-हारः न स्वरूपैक्यनिबन्धनः; किं तु मिथोभेदे सत्येव मुख्यः स्थित इति व्युत्पादनमत्र तुरीयेऽध्याये क्रियते । सेयं शुभा बुद्धिः प्रार्थ्यते

॥ अथ चतुर्थोऽध्यायः ॥

य एकोऽवर्णो बहुधा शक्तियोगात् वर्णान् अनेकान् निहितार्थो दधाति।
वि चैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु ॥१
तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म तदापस्तत् प्रजापतिः ॥ २ ॥

ब्रह्मणः सर्वविधकारणत्वं प्रपञ्चयिष्यन् तद्विषयबुद्धिप्रार्थनामन्त्रमाह **य एक** इति । 'अकारो वै सर्वा वाक् । सैषा स्पर्शोष्मभिरभिव्यज्यमाना बह्वी नानाविधा भवति' इति ऐतरेयश्रुतेः, एकः अवर्णः **निहितार्थः** अर्थः=परं ब्रह्म स्ववाच्यत्वेन निहितः यस्मिन् तथोक्तः परमपुरुषार्थभूतब्रह्मवाचकः—'अकारेणोच्यते विष्णुः' इति श्रुतेः—तादृशः अवर्णः सर्वान् वर्णान् **दधाति** उत्पादयति । [सः ?] विश्वं कृत्स्नं प्रपञ्चम् अन्तकाले **व्येति**—अन्तर्भावितण्यर्थोऽयम्— गमयति नाशयति । स देवः शुभया बुद्ध्या योजयतु । अत्र वाच्यवाचकयोरभेदोपचारात् **स देव** इत्युक्तिः । (१)

तस्य देवस्य सार्वात्म्यमाह **तदेवाग्निरिति** । शुक्रं रोचिष्ठम् । नक्षत्रमण्डलमित्यर्थः । शिष्टं स्पष्टम् । (२)

प्रथमम् य एक इति । शब्दस्य अपर्यवसानवृत्त्या ब्रह्मपर्यन्तवाचित्वरूपमहिमवशात् सामानाधिकरण्येन निर्देश इति ज्ञापनप्रवृत्तत्वादेवोपक्रमे अकारादन्येषां वर्णानामुत्पत्तिप्रस्तावः । अत एव अवर्ण इत्यस्य वर्णरहित इत्यर्थवर्णनेन नीलादिवर्णानां ब्राह्मणादिवर्णानां वोत्पादकत्वपरतया मन्त्रव्याख्यानमनादेयम् । निहितार्थ इत्यर्थपदवर्णपदसमभिव्याहारवलक्षरसप्रतीतशब्दरूपवर्णत्यागश्च न युक्तः । एवं प्रतिपाद्ये ब्रह्मणि अकारवाच्यत्वप्रतिपादनात् अयमध्यायोऽपि—मेव अकारवाच्यं ब्रह्मत्वेन बुबोधयिषतीति ध्येयम् । (१)

त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ।
त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः ॥ ३ ॥
नीलः पतङ्गो हरितो लोहिताक्षस्तडिद्गर्भ ऋतवः समुद्राः ।
अनादिमत् त्वं विभुत्वेन वर्तसे यतो जातानि भुवनानि विश्वा ॥ ४ ॥
अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ ५ ॥

तदेव सार्वात्म्यं सम्बोधनेनाह **त्वं स्त्रीति** । जीर्णः वृद्धस्सन् **दण्डेन** आलम्बनेन **वञ्चसि** सञ्चरसि । अत्यल्पमिदमुच्यते । त्वमेव सर्वरूपो जातोऽसीत्यर्थः । (३)

नील इति । नील-हरित-लोहिताक्षभेदभिन्नः **पतङ्गः** पक्षी त्वमेव ; [तडिद्गर्भ ?] ऋतवः समुद्राश्च । त्वमेवानादि (?) । यतो विश्वानि भूतानि जातानि, तदपि त्वमेव ; निखिलजगत्कारणमपि त्वमेवेत्यर्थः । नीलपतङ्गाद्यात्मत्वमपि न स्वरूपेण, अपितु व्यापकत्वेनाऽऽत्मत्वादित्येतत् प्रदर्शयति **विभुत्वेन वर्तस** इति । यतस्त्वं व्याप्य आत्मतया वर्तसे, तत सर्वात्मत्वमित्यर्थः । (४)

'भोक्ता भोग्यं प्रेरितारञ्च मत्वा', 'क्षरं प्रधानममृताक्षरम्' इति पूर्वनिर्दिष्टचिदचिद्विवेकं दर्शयति **अजामेकामिति** । तेजोबन्नलक्षणविकारगतलोहितशुक्लकृष्णरूपयुक्तां स्वसमानरूपविविधभूतभौतिकसृष्टीम्

[अनादिमत्-आदिमद्भिन्न यथा तथा?] विभुत्वेनेत्युक्ता व्याप्तिः अचेतने चेतने चेति विस्तरेण ज्ञाप्यते शरीरात्मभावनिबन्धनमेव सामानाधिकरण्यमिति विवेकार्थम् अजामित्यादिना। लोहितशुक्लकृष्णामिति पृथिवीपर्यन्तमसमष्टिरूपेण परिणामो विवक्षितः । उपरि व्यष्टिसृष्टि. ।

उत्पत्तिरहिता काञ्चन कश्चिदविद्वान् उत्पत्तिराहित्येन तत्समान एव सन् तत्राहम्बुध्या सेवमान तामनुसृत्य शेते तिष्ठति। अपरो विद्वान् कश्चित् काल भुक्त्वा उत्पन्नवैराग्य त्यजतीत्यर्थ ।

नन्वस्मिन्नजामन्त्रे स्वरसत एतावान् अर्थ प्रतीयते — काचित् छागीं त्रिवर्णां स्वसरूपबहुप्रकाराम् (प्रजाकरीम् ?) एकश्छाग प्रीयमाणोऽनुवर्तते , अन्य तामुपभुक्त्वा त्यजतीति । कथं भवदुक्तप्रकृतिरूपार्थग्रहणम् ? यदि चाध्यात्मशास्त्रे लौकिकार्थप्रतिपादनानौचित्यात् आध्यात्मिकार्थे पर्यवसान कर्तव्यमिति, तर्हि 'द्वा सुपर्णा' इति मन्त्रे वृक्षसुपर्णपिप्पलशब्दै शरीरजीवकर्मफलाना गौण्या वृत्त्या ग्रहणवत् , 'गौरनाद्यन्तवती' इत्यत्र गोशब्देन गौण्या वृत्त्या प्रकृतिग्रहणवत् इहापि अजाशब्देन गौण्या वृत्त्या प्रकृतिग्रहण युक्तम् , न तु यौगिकार्थग्रहणम् । रूढिपूर्वकलक्षणाविशेषरूपगौण्यपेक्षया योगदौर्बल्यस्य प्रोद्गात्रधिकरणे स्थितत्वात्। इतरथा, 'प्रैतु होतुश्चमस प्रोद्गातॄणाम्' इत्यत्रापि यौगिकवृत्त्या उद्गात्रादीना चतुर्णां ग्रहण स्यादिति चेन्न —

मुख्यार्थानुपपत्तौ हि गौणार्थाश्रयण युज्यते । उपपद्यते चाजाशब्दे यौगिकार्थस्य मुख्यस्य ग्रहणम् । न चैव प्रोद्गातृन्यायविरोध । तत्र पाशन्यायेन बहुत्वाविवक्षा नास्ति , प्रोद्गातृशब्दयौगिकार्थबहुत्वस्य सम्भवात्। 'अदिति पाशान् प्रमुमोक्तु' इत्यत्र रूढ्यर्थस्य वा यौगिकार्थस्य वा पाशशब्दार्थस्य बन्धनसाधनस्यासम्भवात् बहुत्वाविवक्षा । इह तु तत्सम्भवात् नाविवक्षत्येव (व ?) तदधिकरणस्थिति । न तु रूढिपूर्वकलक्षणापेक्षया योगस्य जघन्यत्वमित्यपि । नन्वेव सुब्रह्मण्यस्यापि गानकारितया

योगार्थत्वात् तस्यापि ग्रहणप्रसङ्ग इति चेन्न—तस्य सदसि स्थित्यभावेन तत्साधारण्याभावात् । मीमांसकैकदेशिभिः तत्साधारण्यस्याभ्युपेतत्वाच्च ।

ततश्च यौगिकार्थस्य मुख्यत्वाजाशब्दार्थस्य समवे परीत्या छागत्वरूपेण गौणवृत्त्याश्रयणमयुक्तम् । 'गौरनाद्यन्तवती' इत्यत्र गोशब्दे यौगिकार्थास्फुरणात्, 'सर्वकामदुघाम्' इति दोहनस्य गोशब्दरूढ्यर्थग्रहणनियामकस्य सत्त्वाच्च तत्र तथा, इह तु योगार्थस्फूर्तेः, रूढ्यर्थग्रहणनियामकशब्दान्तरसमभिव्याहाराभावाच्च यौगिकार्थ एव ग्राह्यः ।

किञ्च इह रूढ्यर्थग्रहणे समभिव्याहृतानाम्, 'बह्वीः प्रजाः सृजमानाम्' इत्यादीनां सङ्कोचः स्यात् । छागया प्रकृतिवत् सकलप्रजासृष्ट्यसम्भवात् । सकलप्रजासर्गकरप्रकृत्याम् अल्पप्रजासर्गकारिच्छागीत्वपरिकल्पनस्य विच्छित्तिविशेषाहेतुत्वात् । न चैवम्, 'आत्मानं रथिनं विद्धि' इत्यादौ आत्मशरीरादौ रथिरथत्वादिकल्पनमपि न विच्छित्तिविशेषजनकं स्यादिति वाच्यम्, तत्र रूप्यरूपकवाचिपदद्वयश्रवणप्रसङ्गेन, वशीकार्यतामतीत्युपयुक्ततया च रूपणमङ्गीक्रियते । प्रकृते तु रूप्यरूपकवाचिपदद्वयाश्रवणात्, तद्रूपोपयोगाभावाच्च न छागत्वपरिकल्पनम्। 'द्वा सुपर्णा' इति मन्त्रेऽपि वृक्षादिशब्दैर्योगवृत्त्याऽथर्यप्य युक्तम् । समासो

तत्साधारण्यस्याभावादिति । अत एव तस्य गानरसिकान्तर्गतत्वेऽपि गानरसिकत्वरूपयोगार्थवत्त्वमपि नास्तीति भावः । एकदेशिभिरिति । मूलभाष्यस्वरसमनिमनुगतैः प्राभाकरैरित्यर्थः । ३ ५ ७ श्लोकवार्तिकस्य इदं द्रष्टव्यम् ।

यौगिकार्थस्य मुख्यत्वेति । अन्यथा, 'गोऽपि गत्' ...' इत्यादावपि छागस्य ब धर्मपि ग्रहणं दुर्वारं स्यादिति भावः ।

त्वा अर्थान्तरस्फूर्त्या विच्छित्तिविशेषोऽस्तीत्येतावन्मात्रम् । यदि च न वृक्षादिशब्दैः (ब्दे ?) यौगिकार्थग्रहणम्, तर्हि, 'गौरनाद्यन्तवती' इतिवदस्तु । प्रकृते तु अजाशब्दे यौगिकार्थस्य स्फुटप्रतीतेः योग एव ग्राह्यः । एतत् सर्वम्, "कल्पनोपदेशात्" इति सूत्रभाष्यश्रुतप्रकाशिकयोः स्पष्टम् । अनेन प्रकृतिस्वरूपं बद्धमुक्तस्वरूपञ्चोक्तम् ।

नन्वजाशब्देन अकार्यत्वप्रतिपादनात् सृजमानामिति कर्त्रर्थशानचा स्वातन्त्र्यलक्षणकर्तृत्वप्रतीतेः अब्रह्मात्मिकैव प्रकृतिरनेन मन्त्रेणाभिधीयतामिति चेत् — एवमेव समन्वयाध्याये पूर्वपक्षे प्राप्ते उच्यते — "चमसवदविशेषात्" । 'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः तस्मिन् यशो निहितं विश्वरूपम्' इति मन्त्रे, 'अर्वाग्बिलश्चमसः' इति ऊर्ध्वबिलतिर्यग्बुध्नप्रसिद्धचमसव्यावर्तकस्य शिरसश्चमसत्वप्रत्यायकस्य वाक्यशेषस्य सद्भाववत् इह असतन्त्रप्रकृतिव्यावर्तकस्य सांख्याभिमतस्वतन्त्रप्रकृतिप्रतिपादकस्य वाक्यशेषस्याभावेन स्वतन्त्रा प्रकृतिरिहाभिधीयत इति निर्णयासंभवात् । ब्रह्मात्मकत्वेऽपि जनिराहित्यस्योपपत्तेः । परतन्त्रेऽपि तक्षादौ, 'तक्षति काष्ठम्' इति कर्त्रर्थप्रत्ययदर्शनेन तावन्मात्रेण अपर-

---

योग एव ग्राह्य इति । रूढ्यर्थग्रहणे अजेयं संगमार्हा विस्यापचा या अन्या या । अन्त्ये, एकोऽजो न जुषमाणोऽनुशयीत । आद्ये, तामन्योऽजः, इयं प्राग् भुक्तभोगा, तस्मान्माऽस्तु इति जुगुप्सया त्यजतीति लोके किं दृष्टम् ? प्रयत्नेनार्जितं स्पर्धितुमशक्त्या नु त्यजेत् । अतो न रूढ्यर्थानियम इत्यभिप्रायः ।

परतन्त्रेऽपि तक्षादाविति । भृतिलिप्सया परप्रेरणाद्यदादेव स तक्षति । तथापि तस्य धृतवास्यान्तरव्यापारानधीनव्यापारशालि-

तत्त्वप्रकृतित्वनिश्चयासंभवात् ।

ननु ब्रह्मात्मकप्रकृतिग्रहणेऽपि नियामकाभावात् संदेह एव स्यात् । तत्राह, "ज्योतिरुपक्रमा तु तथा ह्यधीयत एके" । 'अथ यदतः परो दिवो ज्योतिर्दीप्यते'इत्यादौ **ज्योतिश्शब्देन** ब्रह्मनिर्देशदर्शनात् इह सूत्रेऽपि **ज्योतिश्शब्देन** ब्रह्मोच्यते । **उपक्रमशब्द** कारणत्वार्थकस्सन् आत्मत्वं लक्षयति । मृत्कारणकस्य घटादेः मृदात्मकत्वदर्शनात् । तथाच (ततश्च) ज्योतिरुपक्रमा—ब्रह्मात्मिकेत्यर्थः । ब्रह्मात्मिकैवाजेह मन्त्रे ग्राह्या । उपक्रमे 'देवात्मशक्तिं स्वगुणैः निरूढाम्'इति ब्रह्मात्मकाजाया एव प्रतिपादितत्वात् । **तैत्तिरीये**, 'अणोरणीयान् महतो महीयान्'इति ब्रह्म प्रस्तुत्य, 'सप्त प्राणाः प्रभवन्ति तस्मात्'इति प्राणोपलक्षितसकलप्रपञ्चोत्पत्तिमभिधाय निर्विकारस्य ब्रह्मणोऽपरिणामितया सकलप्रपञ्चोपादानत्वं न संभवतीति शङ्कावारणाय पठितस्यास्य मन्त्रस्य ब्रह्मात्मकप्रकृतिपरत्वस्य वक्तव्यतया इहापि तथात्वावश्यम्भावाच्च ब्रह्मात्मिकैव प्रकृतिरजामन्त्रप्रतिपाद्या ।

स्वरूपकर्तृत्वविवक्षा निराबाधा । तथैवेहापीति भावः ।

उपक्रमे इति । अनेन ज्योतिः उपक्रमे यस्याः, यन्निरूपणारम्भविषयीभूतं ज्योतिः ज्योतिरुपक्रमा तन्मुखेनैव निरूपितेयं प्रकृतिरित्यपि सूत्रार्थवर्णनं सूचितम् । ब्रह्मोपादानकत्वेन ब्रह्मात्मकत्वमिति । ननु यत् यदुपादानकम्, तत् तदन्तर्यामिकमिति व्याप्त्यभावात् कथमिदमिति चेत्—ब्रह्मात्मकत्वं नाम तदपृथक्सिद्धत्वमित्यभिप्राय, मृदात्मको घट इति मृदुपादानके तदात्मकत्वव्यवहारवत् अयं व्यवहार इति बुद्ध्या शङ्का अपृथक्सिद्धाधारत्वप्रतिबोधनेन परिहार इति । यद्वा ज्योतिरुपक्रमेति पदं ब्रह्मोपादान-

नन्वाकाशादीनां ब्रह्मोपादानकत्वेन ब्रह्मात्मकत्ववत् प्रकृतेरपि ब्रह्मोपादानकत्वेन ब्रह्मात्मकत्वस्य वक्तव्यतया अनुत्पन्नायाश्च तस्याः ब्रह्मोपादानकत्वासंभवेन ब्रह्मात्मकत्वासंभव इत्याशङ्क्याह, "कल्पनोपदेशाच्च मध्वादिवदविरोध."। कल्पनं सृष्टि.। 'धाता यथा पूर्वमकल्पयत्' इति प्रयोगदर्शनात्। 'अस्मान्मायी सृजते विश्वमेतत्' इति **मायाशब्द** शब्दितप्रकृतेः ब्रह्मोपादेयप्रपञ्चसृष्टौ हेतुत्वावेदनादित्यर्थः। प्रकृतेरब्रह्मात्मकत्वे च तस्याः, 'अस्मान्मायी सृजते विश्वमेतत्' इति प्रतिपादितब्रह्मोपादानतानिर्वाहकत्वाभावात् तस्याः ब्रह्मात्मकत्वं सिद्धम्। अपृथक्सिद्धाधारत्वमात्रेणाप्यात्मत्वोपपत्त्या अजन्याया अपि प्रकृतेः ब्रह्मात्मकत्वं संभवत्येवेति ब्रह्मात्मकत्वमविरुद्धम्। **मध्वादिवत्**। अत्र **मधुशब्देन**, 'असावादित्यो देवमधु' इति निर्दिष्ट आदित्य उच्यते। आदित्यवदित्यर्थः। यथा आदित्यस्य, 'नैवोदेता नास्तमेता' इत्यकार्यतया श्रुतस्यैव, 'य आदित्ये तिष्ठन्' इत्यादिना ब्रह्मात्मकत्वञ्च, एवमनादेरप्युपपद्यते ब्रह्मात्मकत्वमिति स्थितम्। प्रकृतमनुसराम। (५)

कत्वार्थकं सत् ब्रह्मात्मकत्वलक्षकमित्युक्तम्। अजायमानायाश्च प्रकृतौ ब्रह्मोपादानकत्वाभावात् तन्मुखेन ब्रह्मात्मकत्वमत्र कथमुच्यत इति शङ्का। परिहारस्तु—ज्योतिरुपक्रमात्वं नाम ज्योतिरधीनोत्पत्तिकत्वम्। तत् प्रकृतेरक्षतम्, महदादिरूपेण परिणामरूपोत्पत्तिमत्त्वात्। तथाच अजागतं लोहितादिरूपबहुप्रजारूपभवनम् अजामन्त्रोक्तं ब्रह्माधीनमिति सौत्रेण ज्योतिरुपक्रमेति पदेनोच्यत इति। इयञ्च ज्योतिरधीना उत्पत्तिः कारणावस्थायामपि ब्रह्मात्मकत्वं गमयतीति अब्रह्मात्मकाजापक्षः सांख्यसंमतः शमितो भवतीति। (५)

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥ ६ ॥
समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।

प्रकृतिसम्बन्धाविशेषेऽपि जीवस्य भोक्तृत्वम् , न परमात्मन इत्येतत् दृष्टान्तमुखेन प्रदर्शयति **द्वा सुपर्णेति**। युज्यत इति **युक्** छन्दो गुणपरः । "समानगुणकः सयुक्' इति व्यासार्यैर्विवृतत्वात् । **सखायौ** परस्पराविनाभूतौ गमनसाधनत्वेन **पर्ण**शब्दितपक्षसदृशज्ञानादिगुणवन्तौ **समानम्** एकं **वृक्षं** वृक्षवत् छेदनार्हं शरीरं समाश्रितौ । तयोर्मध्ये एको जीवः परिपक्वं **पिप्पलम**श्वत्थफलसदृशं कर्मफलमश्नाति । इतरस्तु परमात्मा अनश्नन्नेव अपहतपाप्मत्वादिमहामहिमशाली वर्तत इत्यर्थः । अत्र शरीरतदाश्रयजीवपरवाचिशब्दनिगरणेन विषयिवाचकवृक्ष—सुपर्णादिशब्दैर्वृक्षत्वाद्यध्यवसानलक्षणा रूपकातिशयोक्तिर्विच्छित्तिविशेषायेति केचित् । वृक्षादिशब्देन योगवशाच्छरीरादिप्रतीतिः, न तु रूपकातिशयोक्तिरित्यन्ये।

समान इति । **अनीशया** भोग्यभूतया प्रकृत्या **मुह्यमानः**, 'पराभिध्यानात्तु तिरोहितम्' इति सूत्रोक्तन्यायेन तिरोहितपरमात्मशेषत्वज्ञानाद्यलक्षणस्वस्वरूपस्सन् वृक्षवच्छेदनार्हे एकस्मिन् शरीरे जीवः, 'स्थूलोऽहम्'

बद्धमुक्तवैलक्षण्यमुक्तम् जीवब्रह्मवैलक्षण्यमुच्यते द्वा इति । ज्ञानशक्ती पर्णे । शक्तिश्च बद्धे कर्मवासनादिरूपा । अश्वत्थफलेति । कर्मफलस्य क्षयित्वात् श्वो न स्थास्यतीति युज्यते अश्वत्थत्वम् । तादृशेऽप्यहो स्वादुताबुद्धिर्बद्धस्य । (६)

अस्य बद्धस्य, 'जहात्येनां भुक्तभोगाम्' इत्युक्तावस्थालम्भनार्थमेव स इहाभिचाकशीतीति स द्रष्टव्य इत्युच्यते समान इति ।

जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ ७ ॥
ऋचोऽक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासते ॥ ८

'कृशोऽहम्' इति तादात्म्यबुध्या पांसूदकवत् तदेकतामापन्नस्सन् तत्संसर्गकृतानि दुःखान्यनुभवति। यदा असौ जीवो निमग्नात् स्वस्मात् धारकत्वनियन्तृत्वशेषित्वादिना विलक्षणं स्वकर्मभिः प्रीतं परमात्मानम्, अखिलजगदीशनलक्षणमस्य महिमानञ्च पश्यति, तदा वीतशोको भवतीत्यर्थः । केचित्तु-**अनीशया** अनीशत्वेन असमर्थत्वेन शोचन् स्वोद्धरणसमर्थं स्वयं पङ्कादावनिमग्नं स्वस्मिन् प्रीतिमन्तं तदुद्धरणसामर्थ्यलक्षणमहिमानञ्च दृष्ट्वा वीतशोको भवति। तत्समाधिरत्रानुसन्धेयः। "अनीशया प्रकृत्या" इति **भाष्य**मप्यर्थतो व्याख्यानपरम्। न त्वनीशाशब्दार्थतयेति वदन्ति ।

ऋच इति । न क्षरतीत्यक्षरम् । तादृशे, **ऋचः** ऋक्छन्दोपलक्षितवेदजातस्य **परमे व्योमन्** परमाकाशे परमतात्पर्यविषये यस्मिन्नक्षरे सर्वे देवाः समाश्रिताः, तत् अक्षरं यो न वेद, सः अधीतेन ऋग्वेदादिना किं करिष्यति ? 'स्थाणुरयं भारवाहः(हार.) किलाभूत् अधीत्य वेदं न विजानाति योऽर्थम् ।', 'एतद्वै तदक्षरं गार्गि अविदित्वाऽस्मिन् लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राणि,

जुष्टमिति । तस्य प्रीतिः अस्य तस्मिन् प्रीतिरूपापन्नदर्शनायत्ता । दर्शनस्य प्रीतिरूपापन्नता च महिम्नो वेदने निरतिशयैश्वर्यादिना सर्वप्रकारानन्दरूपत्वस्य तस्मिन् भानाद् भवतीति ज्ञापनार्थं महिमानमित्यधिकमुक्तम्। एतन्मन्त्रद्वयविवरणं मुण्डकेऽपि द्रष्टव्यम्। (७)
ऋचोक्षर इति तज्ज्ञानातिरिक्तोपायनिषेधपरं वा वीतशोकत्वं

छन्दाँसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति ।
अस्मान्मायी सृजते विश्वमेतत् तस्मिँश्चान्यो मायया संनिरुद्धः ॥९॥

अन्यदेवास्य तद् भवति' इति श्रुते । ये च तदक्षरं जानन्ति, ते निरस्तप्रतिकूला सुखमासत इत्यर्थ । इमं मन्त्र विश्वदेवशब्दितनित्यसूर्याश्रय-परमस्थानपरतयापि योजयन्ति ; 'तदक्षरे परमे व्योमन्' इत्यस्य वेदार्थसंग्रहे स्थानपरतया योजितत्वात् । (८)

छन्दांसीति । वेद वैदिकमर्थजात मायाप्रेरक परमात्मा अस्मात् मायाशब्दितात् साधनात् सृजते । अतश्च अपरिणामिनोऽप्युपादानत्वमविरुद्धम् । ननु जीवस्य स्रष्टृत्वं किं न स्यादित्याशङ्कयाऽऽह-तस्मिंश्चान्यो मायया संनिरुद्धः । अन्यो जीव तदाश्रितमायामोहित । अत तस्य मायाप्रेरकत्वाभावान्न स्रष्टृत्वमिति भाव । (९)

प्रागुक्तं यत्र देशे सम्यगासिक्रया संपद्यते, तद्देशप्रदर्शकं वा । तथाच अक्षरपद परमात्मपरं वा स्थानपरं वा । (८)

किमृचा करिष्यतीति ऋगादिवैयर्थ्यं वर्णिते, किमर्थं तस्य स्थितिरित्याशङ्का प्राप्ता ; तत्रोच्यते छन्दांसीति । सर्व निरोधार्थमेव, बन्धनार्थमेवेति भावः । अस्मादित्यस्योपादानपरत्व पञ्चमीस्वारस्यादवगम्यते । उपादनाञ्च प्रकृति प्राक् अजाम् अनीशयेति स्त्रीलिङ्गनिर्दिष्टा । अथापि सामान्ये नपुंसकमिहेति सूचयति साधनादिति । ननु ईश एवोपादानभूत· अस्मादिति गृह्यताम् । न च तर्हि मायीति निर्दिष्ट तस्मादन्यः प्रसजेदिति वाच्यम्—तथासति तस्मिन् मायया संनिरुद्ध इति प्रयोगस्वारस्यात् तच्छब्दमायाशब्दार्थयोरपि भेदावश्यम्भावादिति चेत्—तस्मिन्निति ईशग्रहणे तत्र संनिरुद्धत्ववर्णनायोगात् । एवं वाऽस्तु—अस्मादिति पूर्वोक्तमहिमार्थकम् । महिमबलात् मायी विश्व सृजति । महिम्नि च जीवो निरुद्धः

जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ ७ ॥
ऋचोऽक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासते ॥ ८

'कृशोऽहम्' इति तादात्म्यबुध्या पांसूदकवत् तदेकतामापन्नस्सन् तत्संसर्गकृतानि दुःखान्यनुभवति। यदा असौ जीवो निमग्नात् स्वस्मात् धारक·स्वनियन्तृत्वशेषित्वादिना विलक्षणं स्वकर्मभिः प्रीतं परमात्मानम्, अखिल जगदीशनलक्षणमस्य महिमानञ्च पश्यति, तदा वीतशोको भवतीत्यर्थः । केचित्तु-**अनीशया** अनीशत्वेन असमर्थत्वेन शोचन् स्वोद्धरणसमर्थं स्वं पङ्कादावनिमग्नं स्वस्मिन् प्रीतिमन्तं तदुद्धरणसामर्थ्यलक्षणमहिमानञ्च दृष्ट्वा वीतशोको भवति। तत्समाधिरत्रानुसन्धेयः। "अनीशया प्रकृत्या" इति **भाष्यमप्यर्थतो** व्याख्यानपरम् । न त्वनीशाशब्दार्थतयेति वदन्ति ।

ऋच इति । न क्षरतीत्यक्षरम् । तादृशे, **ऋचः** ऋक्छन्दोपलक्षितवेदजातस्य **परमे व्योमन्** परमाकाशे परमतात्पर्यविषये यस्मिन्नक्षरे सर्वे देवाः समाश्रिताः, तत् अक्षरं यो न वेद, सः अधीतेन ऋग्वेदादिना किं करिष्यति ? 'स्थाणुरयं भारवाह (हार) किलाभूत् अधीत्य वेदं न विजानाति योऽर्थम् ।', 'एतद्वै तदक्षरं गार्गि अविदित्वाऽस्मिन् लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राणि,

जुष्टमिति । तस्य प्रीतिः अस्य तस्मिन् प्रीतिरूपापन्नदर्शनायत्ता । दर्शनस्य प्रीतिरूपापन्नता च महिम्नो वेदने निरतिशयैश्वर्यादिना सर्वप्रकारानन्दरूपत्वस्य तस्मिन् भानाद् भवतीति ज्ञापनार्थं महिमानमित्यधिकमुक्तम् । एतन्मन्त्रद्वयविवरणं मुण्डकेऽपि द्रष्टव्यम् । (७)
ऋचोऽक्षर इति तज्ज्ञानातिरिक्तोपायनिषेधपरं वा वीतशोकत्वं

छन्दाँसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति ।
अस्मान्मायी सृजते विश्वमेतत् तस्मिँश्चान्यो मायया संनिरुद्धः ॥९॥

अ नयदेवास्य तद् भवति' इति श्रुते । ये च तदक्षरं जानन्ति, ते निरस्त प्रतिकूलाः सुखमासत इत्यर्थः । इमं मन्त्रं **विश्वदेवशब्दितनित्यसूर्याश्रय** परमस्थानपरतयापि योजयन्ति, 'तदक्षरे परमे व्योमन्' इत्यस्य वेदार्थ संग्रहे स्थानपरतया योजितत्वात् । (८)

छन्दांसीति । वेदः वैदिकमर्थजातं मायाप्रेरकः परमात्मा **अस्मात् माया**शब्दितात् साधनात् सृजते । अतश्च अपरिणामिनोऽप्युपादानत्वमविरुद्धम् । ननु जीवस्य स्रष्टृत्वं किं न स्यादित्याशङ्क्याऽऽह **तस्मिंश्चान्यो मायया संनिरुद्धः** । अन्यो जीवः तदाश्रितमाया मोहितः । अतः तस्य मायाप्रकरणाभावान्न स्रष्टृत्वमिति भावः । (९)

प्रागुक्तं यत्र देशे सम्यगासिकाया संपद्यते, तद्देशप्रदर्शकं वा । तथाच अक्षरपदं परमात्मपरं वा स्थानपरं वा । (८)

किमृचा करिष्यतीति ऋगादिवस्थ्य वर्णिते, किमर्थं तस्य स्थितिरित्याशङ्का प्राप्ता तत्रोच्यते छन्दांसीति । सत्र निरोधार्थमेव, बन्धनार्थमेवेति भाव । अस्मादित्यस्योपादानपरत्वं पञ्चमीस्वारस्यादवगम्यते । उपादानञ्च प्रकृतिः प्राक् अजाम् अनीशयेति स्त्रीलिङ्गनिर्दिष्टा । अथापि सामान्ये नपुंसकमिहेति सूचयति साधनादिति । ननु ईश एवोपादानभूत अस्मादिति गृह्यताम् । न च तर्हि मायीति निर्दिष्टः तस्मादन्य प्रसजेदिति वाच्यम्—तथासति तस्मिन् मायया संनिरुद्ध इति प्रयोगस्वारस्यात् तच्छब्दमायाशब्दार्थ योरपि भेदावश्यम्भावादिति चेन्न—तस्मिन्निति ईशग्रहणे तस्य संनि रुद्धत्ववर्णनायोगात् । एवं वाऽस्तु—अस्मादिति पूर्वोक्तमहिमानम् । महिमबलात् मायी विश्वं सृजति । महिम्नि च जीवो निरुद्ध

जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ ७ ॥
ऋचोऽक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासते ॥ ८

'कृशोऽहम्' इति तादात्म्यबुध्या पांसूदकवत् तदेकतामापन्नस्सन् तत्संसर्गकृतानि दुःखान्यनुभवति। यदा असौ जीवो निमग्नात् स्वस्मात् धारकत्वनियन्तृत्वशेषित्वादिना विलक्षणं स्वकर्मभिः प्रीतं परमात्मानम्, अखिलजगदीशनलक्षणमस्य महिमानञ्च पश्यति, तदा वीतशोको भवतीत्यर्थः । केचित्तु-**अनीशया** अनीशत्वेन असमर्थत्वेन शोचन् स्वोद्धरणसमर्थं स्वं पङ्कादाविनिमग्नं स्वस्मिन् प्रीतिमन्तं *तदुद्धरणसामर्थ्यलक्षणमहिमानञ्च दृष्ट्वा* वीतशोको भवति। तत्समाधिरत्रानुसन्धेयः । "अनीशया प्रकृत्या" इति **भाष्यम**प्यर्थतो व्याख्यानपरम् । न त्वनी**शा**शब्दार्थतयेति वदन्ति ।

ऋच इति । न क्षरतीत्यक्षर**म्** । तादृशे, **ऋचः** ऋक्छब्दोपलक्षितवेदजातस्य **परमे व्योमन्** परमाकाशे परमतात्पर्यविषये यस्मिन्नक्षरे सर्वे देवाः समाश्रिताः, तत् अक्षरं यो न वेद, सः अधीतेन ऋग्वेदादिना किं करिष्यति ? 'स्थाणुरयं भारवाह (हार.) किलाभूत् अधीत्य वेदं न विजानाति योऽर्थम् ।', 'एतद्वै तदक्षरं गार्गि अविदित्वाऽस्मिन् लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राणि,

---

जुष्टमिति । तस्य प्रीतिः अस्य तस्मिन् प्रीतिरूपापन्नदर्शनायत्ता । दर्शनस्य प्रीतिरूपापन्नता च महिम्नो वेदने निरतिशयैश्वर्यादिना सर्वप्रकारानन्दरूपत्वस्य तस्मिन् ज्ञानाद् भवतीति ज्ञापनार्थं महिमानमित्यधिकमुक्तम् । एतन्मन्त्रद्वयविवरणं मुण्डकेऽपि द्रष्टव्यम् । (७)
ऋचोऽक्षर इति तज्ज्ञानातिरिक्तोपायनिषेधपरं वा वीतशोकत्वे

छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति ।
अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्धः ॥९॥

अन्तवदेवास्य तद् भवति' इति श्रुतेः । ये च तदक्षरं जानन्ति, ते निरस्त-प्रतिकूलाः सुखमासत इत्यर्थः । इमं मन्त्रं विश्वदेवशब्दितनित्यसूर्याश्रय-परमस्थानपरतयापि योजयन्ति ; 'तदक्षरे परमे व्योमन्' इत्यस्य वेदार्थ-संग्रहे स्थानपरतया योजितत्वात् । (८)

छन्दांसीति । वेदं वैदिकमर्थजातं मायाप्रेरकः परमात्मा अस्मात् मायाशब्दितात् साधनात् सृजते । अतश्च अपरिणामिनोऽ-प्युपादानत्वमविरुद्धम् । ननु जीवस्य स्रष्टृत्वं किं न स्यादित्याशङ्क्याऽऽह-तस्मिंश्चान्यो मायया संनिरुद्धः । अन्यो जीवः तदाश्रितमाया-मोहितः । अतः तस्य मायाप्रेरकत्वाभावान्न स्रष्टृत्वमिति भावः । (९)

प्रागुक्तं यत्र देहे सत्यगासिकायां संपद्यते, तद्देशप्रदर्शकं वा । तथाच अक्षरपदं परमात्मपरं वा स्थानपरं वा । (८)

किमृचा करिष्यतीति ऋगादिवैयर्थ्यं वर्णितं, किमर्थं तस्य स्थितिरित्याशङ्का प्राप्ता ; तत्रोच्यते छन्दांसीति । सर्वं निरोधार्थमेव, बन्धनार्थमेवेति भावः । अस्मादित्यस्योपादानपरत्वं पञ्चम्याऽऽ-ख्यायते । उपादानाञ्च प्रकृतिः प्राक् अजाम् अनीदृशेति स्त्रीलिङ्गनिर्दिष्टा । अथापि सामान्ये नपुंसकमिहेति सूचयति साधनादिति । ननु ईश एवोपादानभूतः अस्मादिति गृह्यताम् । न च तर्हि मायीति निर्दिष्टः तस्मादन्यः प्रसजेदिति वाच्यम्—तथासति तस्मिन् मायया संनिरुद्ध इति प्रयोगस्यास्वारस्यात् तच्छब्दमायाशब्दार्थ-योरपि भेदापदस्मायादिति चेत्र—तस्मिन्निति ईशग्रहणे तत्र संनि-रुद्धत्ववर्णनायोगात् । एवं वाऽस्तु—अस्मादिति पूर्वोक्तमहिमार्थकम् । महिमयत्नात् मायी विश्वं सृजति । महिम्नि च जीवो निरुद्धः

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ १० ॥

माया नाम का ? तत्प्रेरकश्च क इत्यत्राह मायां त्विति । त्रिगुणात्मिकां प्रकृतिं विचित्राश्चर्यसर्गहेतुतया मायाशब्दितां विद्यात् । माया(मायायाः) प्रेरकस्तु महेश्वर इति विद्यादित्यर्थः। न च महेश्वरशब्दो देवतान्तरवाचक इति शङ्क्यम् —तैत्तिरीयके, 'यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः' इति अकारवाच्यस्यैव नारायणस्य महेश्वरशब्दार्थत्वाभिधानादिति द्रष्टव्यम् । तस्यापृथक्सिद्धविशेषणतया तदंशभूतैर्जीवैः सर्वमचेतनं व्याप्तमित्यर्थः । ततश्च जगदन्तर्गताः तदपृथक्सिद्धविशेषणतया तदंशभूता इत्यर्थः ॥१०॥

कुण्ठितप्रवृत्तिः ; तद्वेदनाद् व्यावर्तित इति यावत् । यद्वा, पूर्वं पश्यति, वेद इत्युक्तं वेदनम् अस्मादित्युच्यते । वेदनाद्धेतोः=तदर्थमेव मायी सृजते । अयं तु मायापरवशः प्रागादिदर्शितकन्यादिजन्यास्थिरजगदैश्वर्यनिमग्नो वेदने निरुद्धगतिरित्येवम् । पूर्वार्धोक्तच्छन्दोयज्ञादिकर्माधीनत्वं वा 'अस्मात्', 'तस्मिन्' इति विवक्ष्येत । वस्तुतः भाष्योक्तमेव श्रीभाष्यानुरोधि (१.४.१)। (९)

या प्राक् अजा उक्ता सैव माया, यश्च प्रागुक्त ईशः स एव मायीत्युच्यते अन्यत्वभ्रान्तिनिवृत्त्यर्थम् मायामिति। त्रिगुणात्मिकेति। पूर्वं लोहितशुक्लकृष्णामित्यनेन सत्त्वरजस्तमोमयत्वस्यापि कथनसंभवात्, 'देवात्मशक्तिं स्वगुणैर्निगूढाम्,' 'दैवी ह्येषा गुणमयी मम माया' इति श्रुतिस्मृत्यनुसाराच्चेदम् । अत्राप्यध्याये, 'य एकोऽवर्णः-विश्वमादौ स देवः' इति अकारवाच्यं देवं प्रस्तुत्य तत्संबन्धिनी माया मम मायेति [गीतायां] गायंश्च भगवान् अत्र महेश्वरशब्दस्य स्वार्थकत्वं गमयन् तैत्तिरीयसंवादं द्रढयति । (१०)

यो योनि यो(निर्यो)निमधितिष्ठत्येको यस्मिन्निदं सञ्च वि चैति सर्वम् ।
तमीशानं वरदं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति ॥ ११ ॥
यो देवानां प्रभवश्चोद्भवश्च विश्वाधिपो(को?) रुद्रो महर्षिः ।
हिरण्यगर्भं पश्यत जायमानं स नो बुद्ध्या शुभया संयुनक्तु ॥ १२ ॥

यो योनिमिति । **योनि**शब्देन जगद्योनिभूता प्रकृतिरुच्यत इति व्यासार्यैर्व्याख्यातम् । न च तथासति तस्या एकत्वात् वीप्सानुपपत्तिरिति शङ्क्यम् — महदादीनामपि पञ्चभूतात्मकजगद्योनित्वेन वीप्सोपपत्तेः । ततश्च जगद्योनिभूतान् प्रकृतिमहदादीन् योऽधितिष्ठति, यस्मिंश्च विश्वमेतत् उत्पत्तिकाले वियदादिरूपेण व्येति वैविध्यमेति ; संहारकाले च **समेति** ऐक्यं गच्छति । तादृशमाश्रिताभीष्टदायिनं तम् एवं दर्शनसमानज्ञानेन विषयीकृत्य रागद्वेषादिविरागभावासहकृतत्वलक्षणात्यन्तिकत्वोपेतां श्रुत्यादिसिद्धां सर्वानर्थशान्तिमाप्नोतीत्यर्थः । 'यस्मिन्निदं सञ्च वि चैति सर्वम्' इति प्रतिपाद्यमानमुपादानत्वं निर्विकारस्याऽऽत्मनः कथमिति शङ्कावारणाय, 'योनिं योनिमधितिष्ठति' इति प्रकृत्यादिशरीरकत्वादुपपद्यत इति शिष्यानुग्रहार्थं पुनःपुनः कथनमिति द्रष्टव्यम् । (११)

तज्ज्ञाने तदनुग्रह एव कारणमिति तं प्रार्थयते **यो देवाना**-

अस्मान्मायी सृजते इति निमित्तकारणत्वं ब्रह्मणोऽवगमितम् ; उपादानत्वमपि तस्यैवेत्युच्यते यो योनिमिति । वीप्सोपपत्तेरिति । 'अष्टौ प्रकृतयः' इति प्रकृतित्वं तेषामपि हि प्रसिद्धमिति । टीकायां योनिमित्येकपदमात्रव्याख्यानम्, 'यो योनिर्योनिम्' इति पाठानुरोधेनेत्यपि सुवचम् । तदा योनिरिति ब्रह्मविशेषणम् । (११)

अद्वारकसमष्टिकारणस्य व्यष्टिहेतुत्वं हिरण्यगर्भद्वारकं प्रमाणान्तरप्रसिद्धमनूद्य बुद्धिप्रार्थना क्रियते यो देवानामिति । उक्तरीत्या

यो देवानामधिपो यस्मिन् लोका अधिश्रिताः ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ १३ ॥
सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति ॥ १४ ॥

मिति । यो [देवाना] जायमानं हिरण्यगर्भम्, 'असौ अप्रतिहतज्ञानादि-युक्तस्स्यात्' इति सानुग्रहमैक्षत । स मां वीक्षतामिति भाव. । (१२)

यो देवानामधिप इति । सर्वचिदचित्प्रपञ्चशेषिणे सर्वाधार-भूताय सकलनियन्त्रे तस्मै परमात्मने पुरोडाशादिहविषा पूजां कुर्वीमही-त्यर्थ । यज्ञादिभि तदाराधनं तदुपासनद्वारा तत्प्राप्तिसाधनमिति भाव ॥

सूक्ष्मातिसूक्ष्ममिति । सूक्ष्मवस्तुष्वप्यन्तःप्रवेशयोग्यं कार्य ब्रह्माण्डमध्ये हिरण्यगर्भप्रजापत्याद्यनेकरूपेणावस्थाय विश्वस्रष्टारं सर्वा न्तर्यामित्वेऽप्यनवद्यमद्वितीयं परमात्मानं ज्ञात्वा मुक्तो भवतीत्यर्थ ॥ १४

देवादिसर्वनिमित्तोपादानभूतः हिरण्यगर्भमुत्पाद्यानुगृह्णाति । तेन न निमित्तमात्रं भवति। अत्रापि रुद्रत्वं न विधेयम्, अनुवादान्तर्गतत्वात्।

ननु निष्कामकर्मकरणात् बुद्धिः शुभा जायते । कर्माणि च नानादेवताप्रीत्यर्थानि। तत् कथं 'स नो देव.' इत्यादि इत्यत्र, सर्वान् देवान् प्रत्यपि तस्यान्तरात्मत्वात् स एव सर्वकर्मसमाराध्य इति ज्ञाप्यते यो देवानामधिप इति । अत्र शेषित्वाधारत्वनियन्तृत्वरूप त्रयमपि आत्मशब्दप्रयोजकमुदितम् । कस्मै इति तस्मै इत्यत्र पर्यव-सन्नम् । तं विना अन्यस्मै कस्मै हविषा धर्मं कुर्याम्, तस्मै एकस्मै कस्मैचित् सर्वदेवात्मने कुर्यामित्यर्थः । एवञ्च देवानां काम्यकर्मा-राध्यत्वेऽपि निष्कामकर्माराध्यत्वं न भवतीति अत्र सूचितम् । (१३)

सर्वान्तर्यामित्वेऽप्यनवद्यत्वमित्यनुसंधाप्यते सूक्ष्मेति । (१४)

स एव काले भुवनस्य गोप्ता विश्वाधिपः सर्वभूतेषु गूढः ।
यस्मिन् युक्ता ब्रह्मर्षयो देवताश्च तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति ॥
घृतात् परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम् ।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १६ ॥
एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये संनिविष्टः ।
हृदा मनीषा मनसाऽभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥ १७ ॥

स एव काल इति । ब्रह्मविदो मुनयो देवताश्च यत्र मनो योजयन्ति, स एव परमात्मा कर्मपरिपाककालविशेषे जगतः **गोप्ता** संसारमोचकः ; कुतः ? **विश्वाधिपः सर्वभूतेषु गूढः** । सर्वशेषित्वात् सर्वान्तर्यामित्वाचेत्यर्थः । शेषशेषिभावशरीरात्मभावसम्बन्धसत्त्वात् तादृशस्य शक्तस्य मोचकत्वौचित्यादिति भावः । **तमेवमिति** । अनेनाऽऽकारेण तं जानन् दर्शनसमानाकारज्ञानेन विषयीकुर्वन् मुक्तो भवतीत्यर्थः ॥

घृतादिति । यथा घृतस्य सारांशः सूक्ष्मः क्षीरव्यापी, एवं सर्वत्र सूक्ष्मतया दुर्ज्ञानतया, व्याप्य वर्तमानत्वेऽप्यनवद्यतया मङ्गळमूर्तं ज्ञात्वा मुक्तो भवतीत्यर्थः ।   (१६)

एष देव इति । विश्वं **कर्म**—क्रियत इति कर्म—कार्यं यस्य स तथोक्तः । जगत्कर्तेत्यर्थः । इतरत् उक्तार्थम् ।   (१७)

घृतात् परमिति । क्षीरदध्यादौ सूक्ष्मं सत् व्याप्तमेव मण्डं भूत्वा घृतं भवति । अतो 'घृतात् परम्' इति क्षीरादिव्यापनक्षमात् घृतपरिणामादप्युत्कृष्टा पूर्वावस्थोच्यते ।   (१६)

अन्यदुक्तार्थमिति । तृतीये त्रयोदशमन्त्र इति शेषः ।   (१७)

एवं बहुभिर्मन्त्रैः तज्ज्ञानस्यैवामृतत्वहेतुत्वमुपवर्ण्य संध्योपास्ति-

यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः ।
तदक्षरं तत् सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी ॥ १८ ॥

गायत्रीप्रतिपाद्यत्वमपि तस्यैवेत्याह यदा तम इति । यस्मिन् काले सदसच्छब्दितमूर्तामूर्तप्रपञ्चं दिवारात्रविभागश्चान्तरेण तमोमात्रमवस्थितम्, तस्मिन् काले, ब्रह्मादिषु प्रलीनेषु नष्टे स्थावरजङ्गमे । [आभूतसंप्लवं प्राप्ते प्रलीने प्रकृतौ महान् ।] एकस्तिष्ठति विश्वात्मा स तु नारायणः प्रभुः' इत्युक्तरीत्या ज्ञानसंकोचलक्षणाशुभमन्तरेण केवलं शुभतयाऽवस्थितम्; तदेव क्षरणशून्यं वस्तु; सवितृमण्डलमध्यवर्ति;

प्रभृतिसर्वकर्माराध्यत्वात् तस्य, तस्य प्रीतस्य शुभबुद्धिप्रेरकत्वं प्रागुक्तं युक्तमिति निगम्यते यदेति । 'यदा तमः' इत्यत्र नञः अभावात् न प्रलये तमोनिषेधः । अत इदं तमः प्रागुक्ता मायेति ज्ञायते । स्पष्टमिदं सुबाले । मूर्तामूर्तब्राह्मणे बृहदारण्यकगते सदिति तेजोबन्नरूपं मूर्तं गृहीत्वा तदन्यस्य वायोरन्तरिक्षस्य चामूर्तत्वमुक्तम् । तदत्रानुसंधापयति मूर्तामूर्तेति । यदेत्यस्य तदिति प्रतिसंबन्धि । अत्र, यदा तमः, तदा दिवारात्रादिकं विना केवलः शिवः स्थित इत्यर्थस्य वर्णनीयत्वेऽपि यच्छब्दघटितवाक्ये न दिवेत्याद्यंशार्थघटनं भाष्ये कृतं तमश्शब्देन स्थूलावस्थारहितस्य तमस एव ग्राह्यत्वज्ञापनाय । न दिवेत्यादिना जडप्रपञ्चस्य तदा निषेधवत् जीवप्रपञ्चस्यापि तदा निषेधार्थं शिव एव केवल इति । शिवः केवलः स्थितः; अशिवः दुःखाक्रान्तो व्यष्टिजीवप्रपञ्चो नासीदित्यर्थः । अस्य वाक्यस्य शिवसद्भावविधौ न तात्पर्यम्; किंतु विवक्षितनिषेधे । एवकारस्वरसे वाक्यस्य तदर्थविधानपरत्वात् । अतश्च यः शिवः प्रमाणान्तरतः प्रलयस्थितनयाऽवधारितः, स इह ग्राह्यः । स च प्राक्, 'सर्वव्यापी स भगवान् तस्मात् सर्वगतः शिवः' इत्यादिना अनुवादरूपेण यदु-

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
न तस्य प्रतिमा अस्ति यस्य नाम महद् यशः ॥ १९ ॥

चरणीयं भजनीयञ्च तदेव । तस्मादेव हेतोः सृष्टिकाले प्रजानां सैकुचितज्ञानस्य नित्यस्य प्रसरणमिति भावः । प्रज्ञा च तस्मादित्यनेन, 'धियो यो नः प्रचोदयात्' इत्यर्थप्रतिपाद्यत्वमपि तस्यैवेत्युक्तं भवति ॥

नैनमिति । ऊर्ध्वस्थाण्वादिरूपतया, पश्वादितिर्यग्रूपतया, तदुभयविलक्षणमनुष्यादिरूपतया स तन्मध्येन कोऽपि जनः परितः सम्यक् समन्तात् न जग्रभत् नाग्रहीत् । यद्वा ऊर्ध्वदेशादिषु न कोऽपि ज्ञातवान् । तस्य विभुत्वादिति भावः । यस्य महद्यश इति नाम— यस्त्वपरिच्छिन्नकीर्तिः प्रसिद्धः, तस्य सदृशं किमपि वस्तु नास्तीत्यर्थः ॥

इत्थं शिवशब्देनैव अनन्तरं सङ्कल्पात्मा य उक्तः स एव कैवल्यशिवः प्रसिद्धशिवविलक्षणः अपहतपाप्मादिशिवः, शाश्वतशिवो ऽच्युतः इति न पूर्वसन्दर्भानुसन्धायिना देवतान्तरग्रहणप्रसक्तिरिहापीति ध्येयम् । एवञ्च कैवल्यपदमपि सार्थकम् । तत् कैवल्यशिवम् । नपुंसकनिर्देशः सावित्र्या तच्छन्दग्राह्यसर्वनियन्तृत्वस्य बुद्धिस्थत्वात् । तत् सवितुः सवितृसम्बन्धि । तद्विवरणम्, सवितृमण्डलमध्यवर्तीति । 'धियो यो नः प्रचोदयात्' इत्यत्र पुल्लिङ्गयच्छब्दस्य सवितृशब्दवाच्यसूर्यपरत्वेऽपि न तदर्थतः धीप्रेरकत्वं विवक्षितम्, किन्तु तदन्तर्वर्तिनः परमात्मन इति ज्ञापनाय, प्रज्ञा च तस्मादिति । पुराणी अनादिर्नित्या, 'अविनाशी वा अरे ऽयमात्मा अनुच्छित्तिधर्मा' इति धर्मभूतज्ञानस्य नित्यत्वश्रुतेः । तादृशी प्रज्ञा तस्मात् परमात्मन एव हेतोः—तदनुग्रहादेवेति यावत्—प्रसृता प्रसरणं विकासं सङ्कोचविशेषं प्राप्नोतीति । (१८)

स्वरूपतो गुणतश्चापरिच्छिन्नत्वमुच्यते नैनमिति । (१९)

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा हृदिस्थं मनसा य एनमेवं विदुरमृतास्ते भवन्ति ॥ २० ॥
अजात इत्येवं कश्चिद्भीरुः प्रपद्यते ।
रुद्र यत् ते दक्षिणं मुखं तेन मां पाहि नित्यम् ॥ २१ ॥

....(२०)

अजात इति । हे संसाररुद्रावक ! त्वम् । अजातः जननादिलक्षणसंसारहीन इति मत्वा कश्चित् पुरुषापशदोऽहं दाक्षिण्यशालि 'उदग्र पीनांसविलम्बिकुण्डलालकावलीबन्धुरकम्बुकन्धरम्, प्रबुद्धमुग्धाम्बुज चारुलोचनं सविभ्रमभ्रूलतमुज्ज्वलाधरम्, शुचिस्मितं कोमलगण्डमुन्नसं ललाटपर्यन्तविलम्बितालकं' मुखं प्रपद्यते प्रपद्ये=ध्यायामि । प्रपद्यत

विग्रहतः स्वरूपतश्चाचाक्षुषत्वमुच्यते न संदृश इति । एतद्व्याख्यानमिह न लभ्यते ; कठोपनिषदि (६.९.) द्रष्टव्यम् । (२०)

ध्यानस्यैवं मोक्षसाधनत्वावगमात् ध्यानं कुर्वन् फलमर्थयते अजात इति । जन्मप्रबन्धरूपसंसाराद् भीतः जन्मरहितं भगवन्तं प्रपद्ये, तत्क्रतुनयेन जन्मराहित्यरूपसाधर्म्यसंपत्त्यै इति भावः । स्वस्य, अहमित्यनिर्दिश्य कश्चिदिति निर्देशः नैच्यानुसंधानेन अनहङ्कारस्य चिनयस्याऽऽविष्करणाय ; तदाह पुरुषापशद इति । एवमपि तेन मामिति वक्ष्यमाणानुसारेण कश्चिदहं प्रपद्ये इत्युक्तावपि नैच्यलाभात्, कश्चिदित्यनेन स्वान्यस्य ग्रहणं मा भूदिति कश्चिदहमित्येव वक्तुमुचितमित्याशयेन पुरुषव्यत्ययश्छान्दस इत्युक्तम् । मुखस्य रक्षणसाधनत्वकथनं न स्वरसम् । तदपेक्षया प्रपद्यत इति पद्लृधातोः गत्यर्थकस्य ध्यानार्थकत्वं युक्तमिति मुखस्य तत्कर्मत्वविवक्षया तृतीयपादस्य पूर्वार्धेऽन्वयः स्वीकृतः । अतश्च यदित्यस्य यस्मादिति, तेनेत्यस्य

मा नस्तोके मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदसि त्वा हवामहे ॥ २२
इति श्वेताश्वतरोपनिषदि चतुर्थोऽध्यायः ॥

इति पुरुषव्यत्ययः छान्दसः । तेन ध्यानेन मा **निरयं पाहि** निरस्तसंसारं कुर्वित्यर्थः । स्तनन्धयप्रजाया अवतरणमुखभूतस्तनवत् अवतरणमुखभूतं चरणारविन्दं प्रपद्य इति वाऽर्थः ।   (२१)

मा नस्तोक इति । अपत्यपुत्रायुर्गवाश्वादिप्रवणतया मा मा हिंसीः । 'रिष हिंसायाम्' इति धातुः । हे संसाररुद्रावक ! त्वम् असदपचारेण **भामितः** कुपितस्सन् वीर्ययुक्तान् ज्ञानवैराग्यादीन् मोक्षौपयिकान् **मा वधीः** मा हिंसीः । त्वत्पूजोपकरणपुरोडाशादिलक्षणहविरादियुक्ताः सन्तः त्वा सदसि **हवामहे** आराधयाम । इदित्यवधारणे । त्वामेवेत्यर्थः ।   (२२)

इति चतुर्थाध्यायप्रकाशिका ।

स्वार्थ इष्टः । पूर्णध्यानासमर्थस्य अवयवध्यानमप्यलमिति मुखमित्युक्तम् ।   (२१)

भक्तिनिष्पत्तये परिकरान् अपेक्षमाणस्य पुंसः काम्यकर्माराध्योऽपि भवति स इति बोध्यते मेति । पूर्वार्धे प्रतिमाऽपदं रीरिष इति सवध्यते । 'सदमित् त्वा' इति पाठे सदमित्यस्य सदेत्यर्थः ; सदसीत्येव वा । त्वा हवामहे इत्यनेन काम्यस्यापि भगवदाराधनत्वेन करणमुचितमिति ज्ञाप्यते; अन्येषामपि भक्तानामाराध्येषु देवेषु भगवच्छेषत्वधियः सत्त्वात् ।   (२२)

अथ पञ्चमोऽध्यायः

ननु अहं ब्रह्मास्मीत्यनुसंधानरूपत्वात् ब्रह्मोपासनस्य जीव-

अथ पञ्चमोऽध्याय ॥

द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे ।
क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्य ॥ १ ॥

पुनरपि ब्रह्ममाहात्म्यं (तादात्म्यं) चिदचिद्विवेकञ्च प्रपञ्चयति । द्वे **अक्षरे** इति । **ब्रह्मपरे** ब्रह्माराधनरूपे **अनन्ते** असङ्ख्यातव्यक्तिके नित्यानित्यफलसाधनतया [¹ **क्षरामृतशब्दिते**] **विद्याविद्याशब्दिते**(त²) ज्ञानकर्मरूपे[द्वे²]यत्र **अक्षरे** आत्मनि **गूढे** दुर्मोचतया स्थे, [सोऽन्यः। यस्तु द्वे ईशते²] सोऽप्यन्य । आभ्यां समाराध्यमानः तत्फलप्रदश्चान्य इत्यर्थः ।

ब्रह्मैक्यमेव्यमिति भ्रमापनुत्तये बृहदारण्यकादौ देवानामृष्यादीनाञ्चोक्तम् अहं ब्रह्मास्मीत्युपासनमपि जीवभिन्नब्रह्मोपासनमेवेति ससूत्रं ब्रह्मणो महत्त्वम्, जीवस्यात्यन्तं तद्वैलक्षण्यञ्चाणुत्वादिरूपं निरूपयितुं पञ्चमोऽध्याय आरभ्यते । तमवतारयति पुनरपीति । अक्षरे इत्येतत् द्वे इत्येतत्समानाधिकरणं न भवति । ब्रह्मभिन्नाक्षरद्वयाभावात् । 'क्षरं प्रधानममृताक्षरं हरः' इति प्रागुक्तरीत्या क्षरामृतशब्दाभ्यां प्रकृतिपुरुषयोर्ग्रहणेन विद्याविद्याशब्दयोरपि ज्ञानस्वरूपजडात्मकनिष्ठचिदचित्परत्ववर्णनसम्भवेऽपि द्वे अक्षरे इति हि न तद्ग्रहणसंभवः । क्षरत्वेन वर्णनाद्यमरं पत्र प्रकृतेरक्षरत्वकथनानौचित्यात् । अत अन्यथा व्याकुर्वन् पूर्वार्धं जीवपरम्, उत्तरार्धञ्च ब्रह्मपरमाह द्वे इति । अक्षरे इति सप्तम्यन्तं जीवपरं यत्रेत्येतत् समानाधिकरणम् । विद्याविद्यापदे ज्ञानकर्मपरे । पूर्वार्धेऽपि जीवपरतया सोऽन्य इत्यस्योत्तरार्धगतस्यापकर्षः स्वरससिद्ध इत्यभिसन्धायाह ब्रह्माराधनेत्यादि । गूढे निहिते इत्यस्य विवरणं दुर्मोचतया स्थे इति । एवं वाक्यद्वयस्यार्थभेदे तु शब्दस्वारस्यम् । अस्तु वा द्वयमपि ब्रह्मपरम् अक्षरञ्च ब्रह्मैवेत्येव भाष्याशय इति । (१)

यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः ।
ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् ॥ २ ॥
एकैकं जालं बहुधा विकुर्वन्नस्मिन् क्षेत्रे संहरत्येष देवः ।
भूयस्सृष्ट्वा पतयस्तथेशः सर्वाधिपत्यं कुरुते महात्मा ॥ ३ ॥

यो योनिमिति । सर्वाणि समष्टिव्यष्टिरूपाणि तत्तद्योनीश्च सर्वा योऽधितिष्ठति, यस्तु अग्रे सृष्टिपूर्वसमये प्रसूतं कपिलं ज्ञानादियुक्तं **बिभर्ति** कृतवान्, जायमानदशायाञ्च सानुग्रहमैक्षत, **सोऽप्यन्य** इति पूर्वेण संबन्धः । (२)

एकैकमिति । यस्मिन् क्षेत्रे प्रकृतिरूपे जालवद् बन्धकं महदादिकार्यवर्गं विविधतया कुर्वन् पुनश्च संहरति, तस्मिन्नेव प्रकृतिरूपे क्षेत्रे **भूयः** कल्पान्तरेऽपि प्रजापत्युपलक्षितं प्रपञ्चं सृष्ट्वा सर्वदा सर्वेषां नियन्तृतयाऽऽस्ते यतोऽसौ, [ततो ?] महामहिमशाल्यात्मेत्यर्थः । (३)

ब्रह्मत्वेन शंसयमानात् कपिलादितोऽप्यन्यतया स्थितस्य परब्रह्मणः सुतरां जीवैक्यमिति बुबोधयिषया कपिलादिर्द्वितीयमन्त्रे प्रस्तुतः । योनिं योनिमिति सर्वसमष्टिग्रहणम् । विश्वानि रूपाणीति नामरूपे व्याकरोदित्युक्तसर्वव्यष्टिरूपग्रहणम् । योनीश्च सर्वा इति समष्टिव्यष्टिसर्वकारणभूतकालस्वभावादिकारणग्रहणम् । जायमानञ्चेति प्रसक्तकपिलमात्रग्रहणौचित्यात् पश्येदित्यस्य अपश्यदित्यर्थ उक्तः । अन्यथा सकलजायमानपुरुषदर्शनस्य तत्क्रियमाणत्वाभावेन जायमानञ्च पश्येदिति सामान्योक्त्ययोगात् । (२)

अनन्तब्रह्मकल्पकारणत्वादस्य चतुर्मुखाद्यतिशायितं माहात्म्यमित्युच्यते एकैकमिति । जालं-समष्टिवर्गं विकुर्वन्-व्यष्टिरूपेण कुर्वन् । तथा-एवम् । भूयः महाप्रलयात् पश्चात् । पतय इति द्वितीयार्थे प्रथमा ।

सर्वा दिश ऊर्ध्वमधश्च तिर्यक् प्रकाशयन् भ्राजते यद्वनड्वान् ।
एवं स देवो भगवान् वरेण्यो योनिस्वभावान् अधितिष्ठत्येक: ॥ ४ ॥
यच्च स्वभावं पचति विश्वयोनि: पाच्यांश्च सर्वान् परिणामयेत् य: ।
सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान् विनियोजयेत् य: ॥५॥
तद् वेदगुह्योपनिषत्सु गूढं तद् ब्रह्मा वेदते ब्रह्म योनिम् ।
ये पूर्वं देवा ऋषयश्च तद्विदुस्ते तन्मया अमृता वै बभूवु: ॥ ६ ॥

नन्वेत(स्य)स्य कथं युगपत् सर्वयोन्यधिष्ठातृत्वमुपपद्यत इत्यत्राह **सर्वा दिश** इति । कालचक्रपरिवर्तनहेतुतया अनड्वच्छब्दवाच्य सूर्य तिर्यगूर्ध्वमधश्च युगपद्भासयन् **यत्**—यथा भासते, तथा मुमुक्षुभिर्वरणीय भजनीयो भगवानेक एव सर्वयोन्यधिष्ठाता भवतीत्यर्थ । (४)

यच्चेति । यच्चेति लिङ्गव्यत्ययश्छान्दस । य सर्वेषामग्निजलादिवस्तूनाम् उष्णानुष्णस्वभाव **पचति** संकल्पलक्षणपाकेन निर्वर्तयति, यश्च **पाच्यान्** परिणामयोग्यान् परिणमयति । सत्त्वा(सत्वा)-दींश्च गुणान् प्रवर्तयति, स परमात्मा सर्वप्रकृत्यधिष्ठातेत्यर्थ । **तद्वेदेति** । तेषु प्रसिद्धेषु वेदेषु गुह्योपनिषत्सु [च] तात्पर्यविषयतया प्रतिपाद्य ब्रह्मणो वेदस्य योनिभूतं तत् परं ब्रह्म सकलवेदप्रवर्तक **ब्रह्मा** चतुर्मुख **वेदते**

तदाह प्रजापत्युपलक्षितमिति । प्रजापतय चतुर्मुखदक्षादय मत । ३

कालचक्रेति । अनड्वान् हि अनसि युक्त चक्रपरिवर्तनहेतु । तथा सूर्य दिनमासवर्षायनादिकालात्मकचक्रपरिवर्तकत्वादनड्वानिति ।

'काल स्वभावो नियति'रित्यादिमन्त्रोक्तस्वभावादीनामेतदधी-नत्वमिति प्रतिपाद्यते यच्चेति । ईदृशब्रह्मवेदनात् मुक्ति· चतुर्मुखा-दीनां देवानामृषीणाञ्चेति अस्योपास्यत्वमुच्यते तदिति । अत्र वृहदा-

गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता ।
स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिः ॥ ७ ॥
अङ्गुष्ठमात्रो रवितुल्यरूपः सङ्कल्पाहङ्कारसमन्वितो यः ।

जानाति । अतादृशो न जानाति । ये च पूर्वे देवा ऋषयश्च तत् ज्ञातवन्त, ते सर्वे स(तत्स ?)मानाकारा मुक्ता बभूवुरित्यर्थ । ५-६

एवं परमात्मस्वरूप तज्ज्ञानस्यामृतत्वसाधनत्वञ्चोक्त्वा जीवस्वरूपं शोधयति गुणान्वय इति । सत्त्वरजस्तमोगुणानामन्वयो यस्य स तथोक्तः । सत्त्वादिगुणान्वितस्सन् यत् फलसाधनभूतं कर्म य करोति, स एव तस्यैव फल भुङ्क्ते । एव नियतकर्तृत्वभोक्तृ त्वशाली स्थावरनरपक्ष्यादिरूपयुक्त कामक्रोधलोभरूपगुणत्रययुक्तो देवयानपितृयाणकष्टगतिरूपमार्गत्रययुक्तः प्राणसहचरितस्सन् कर्मपाशबद्ध सञ्चरतीत्यर्थ । (७)

अङ्गुष्ठमात्र इति । बुद्धेः अन्त करणस्य सत्त्वरजस्तमोलक्षणगुण-

---

रण्यस्थितम्, 'योयो देवाना प्रत्युबुध्यत, अहं ब्रह्मास्मीति, तथर्षीणां तथा मनुष्याणां स एव तदभवत्' इत्यादि वाक्यमनुसंधेयम् । ५-६

एव देवैः ऋषिभिश्च क्रियमाणम् अह ब्रह्मास्मीत्युपासनं न जीवब्रह्माद्वैतपरम्, ब्रह्मणा महता जीवस्यात्यन्ताणोः ऐक्यायोगात् । किंतु शरीरात्मभावायत्तविशिष्टैक्यपरमिति व्युत्पादयितुं जीवाणुत्वमुपदिश्यते गुणान्वय इत्यादिना । तत्र परमात्मवत् अस्य विभुत्वं न स्वीकार्यम्, कर्मफलभोगार्थोत्क्रान्त्यनेकलोकगत्यागतीना संप्रतिपन्नत्वादिति परममहत्त्वनिरासः प्रथममन्त्रेण क्रियते । (७)

भवतु तर्हि मध्यमपरिमाण । न च तदा सावयवत्वादनित्यत्वापत्तिरिति वाच्यम्—श्रीवैकुण्ठनगर-गोपुर-परविग्रहादीनामिव सावयवत्वेऽपि प्रमाणबलेन नित्यत्वस्य संभवात् । अणोर्महतश्चैव

बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्टः ॥ ८ ॥

कारितेन आत्मधर्मभूतनानाविधार्थविषयकाध्यवसायेन युक्त तत्कार्येण तत्तत्फलसङ्कल्पेन, 'आढ्योऽभिजनवानस्मि' इत्यहङ्कारेण [च?] युक्तस्सन् आत्मवत् स्वप्रकाश, 'अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्' इत्युक्तरीत्या अङ्गुष्ठपरिमाणः शास्त्रेषु दृष्टः । ततोऽपि अवरः हीन-परिमाणः आराग्रमात्र इत्यपि दृष्टः—शास्त्रेषु दृष्ट इत्यर्थः । (८)

अन्यविधपरिमाणकस्यापि प्रमाणतो निरवयवत्वस्वीकारसंभवाच्चेत्यत्र तत् परिमाणं प्रत्यग्वस्तुनः श्रूयमाणमव्यवस्थितं काल्पनिकमित्युच्यते अङ्गुष्ठेति । 'अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्' इत्येतादृश-प्रमाणानुसारादङ्गुष्ठमात्रत्वस्यैव, आराग्रमात्रत्वादेरपि प्रामाणि-कत्वादेकतरपरिशेषे न किञ्चिन्नियामकमिति भावः । रवितुल्यरूप इति । स्वप्रकाशोऽयं यदि मध्यमपरिमाणतयाऽपि प्रकाशमानः स्यात्, तदा तत् स्वाभाविकं स्यात्; न त्वेवमिति सूचनायैतदुक्तिः । अङ्गुष्ठमात्रत्वं न वास्तवम्, किन्तु हृदयस्याङ्गुष्ठपरिमाणत्वात् हृदय-परिच्छिन्नत्वप्रयुक्तमिति दर्शयितुं बुद्धेर्गुणेनेत्युक्तम् । नन्वत्यन्ताणोः हृदयकुहरकोणनिलीनस्य स्थूलं हृदयमादाय तत्परिमाणत्ववाचो-युक्तिरपि कथमित्यत्र जैवधर्मभूतज्ञानविकासस्य प्रसृमरस्य हृदय-परिच्छिन्नत्वादिति ज्ञापयितुम् आत्मगुणेन चैवेति । आराग्रमात्रोऽ-ह्यवरोऽपि दृष्ट इति । आरा चर्मसूची । तदग्रमात्रोऽपीत्यन्वयः । नर-हृदयस्याङ्गुष्ठमात्रतया तत्र स्थितिदशायां जीवस्यातथात्वसंभवेऽपि मशकपिपीलिकाद्यणुदेहगतस्य आराग्रमात्रत्वादिकमप्येष्टव्यं हीति भावः । नर्हि यथायथं संकोचविकासस्वभाविनस्तद्बहुविधपरिमाण एवायम् अस्तु इति चेन्न-तथासति देहसमानपरिमाणतादिजैनमतावतारात् । निरवयवत्वनिर्विकारत्वश्रुतिविरोधात् तदयोगादिति । (८)

वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ ९ ॥

नैव स्त्री न पुमानेष न चैवायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेनतेन स युज्यते ॥ १० ॥

स्वमतमुपन्यस्यति वालाग्रेति । वालाग्रशतांशशतांशतुल्यपरिमाण एव जीवो मोक्षे धर्मभूतज्ञानविकासेन विभुत्वलक्षणानन्त्याय प्रभवतीत्यर्थः ।

स्त्रीपुंनपुंसकत्वादिकमपि तस्य तादृशशरीरसंबन्धकृतम् ; न [तु] स्वाभाविकमित्याह नैव स्त्रीति । स्पष्टोऽर्थः । (१०)

अतोऽयमत्यन्ताणुरिति सिद्धान्त उच्यते वालेति । शतभागस्येत्यादिकमत्यन्ताणुत्वनिर्भागत्वनिरूपणेदम्परम् । एवम्भूतस्य आराग्रमात्रत्वाङ्गुष्ठमात्रत्वयोरुपपादनं नाशक्यम् । मुक्तावानन्त्यस्यापि संमतेः, तदुपपादनं यत् धर्मभूतज्ञानमादाय, तदेवादाय एतयोरप्युपपादनं शक्यम् अवस्थाविशेषग्रहणेनेति सूचयितुं स चानन्त्याय कल्पत इत्युक्तम् । आनन्त्याय च–अपरिच्छिन्नत्वाय च । धर्मभूतज्ञानस्य सर्वव्यापी विकासो मुक्ताविति तद्द्वारा जीवस्यानन्त्यमिति व्यक्तं भाष्यादौ । स विज्ञेय इत्यनेनाणुत्वविधाने नैर्भयविष्करणात् अणुत्वस्य काल्पनिकत्वम्, आनन्त्यस्य वास्तवत्वञ्चाव नेव वक्तु शक्यम् । उभयस्वीकारे निर्विकारत्वभङ्ग स्यात् । (९)

ननु जीवस्य स्त्रीपुरुषनपुंसकात्मना त्रैविध्यस्य प्रसिद्धत्वात्, स्त्रीत्वादेश्चावयवसंनिवेशविशेषादिनैवोपपाद्यत्वात् सावयवत्वमावश्यकमिति कथमयमत्यन्ताणुरिति शङ्कायाम्–स्त्रीत्वादिकं शरीरगतम्, न त्वात्मगतमिति परिहारः क्रियते नैव स्त्रीति । एक एव जीवः कालभेदेन स्त्री च भवति, पुरुषोऽपि भवतीति दृष्टम् । अतः

सङ्कल्पन-स्पर्शन-दृष्टि-होमैर्ग्रासाम्बुवृष्ट्या ऽऽत्मविवृद्धजन्म ।
कर्मानुगान्यनुक्रमेण देही स्थानेषु रूपाण्यभिसंप्रपद्यते ॥ ११ ॥

देहनाशे हेतुमाह संकल्पनेति । पुण्यविषयकसंकल्प-गङ्गादि-लक्षणपुण्यवस्तुस्पर्श-तादृशवस्तुदर्शन-यागहोमादिभिरात्मनो विवृद्धियुक्तं जन्म-उत्कृष्टं जन्मेति यावत्-अनेन क्रमेण (?) कर्मानुसारीणि रूपाणि

स्त्रीजीव एव स्त्री, पुरुषजीव एव पुरुष इति न निर्बन्धः। एवञ्चापृथ-क्सिद्धशरीरगतस्त्रीत्वादिनैव व्यवहारनिर्वाहे, (माध्वमत इव) जीवेऽपि साक्षात् तदङ्गीकारे न किञ्चित् प्रमाणम् । किमुत मुक्त-कण्ठमिह निषेधे सति ।

एवंरूपशरीरग्रहणे कारणमुच्यते संकल्पनेत्यादिना । आत्म-संबन्धि यत् विवृद्धमुत्कृष्टं जन्म, तत् संकल्पनादिभिर्भवतीत्यर्थः । अनेन निकृष्टजन्मकारणमेतद्विपरीतरूपमित्यर्थसिद्धम् । विवृद्धि-जन्मेति पठित्वा विवृद्धिश्च जन्म चेति द्वयमात्मनः संकल्पनादि-भिरिति परे व्याचक्षते । विवृद्धिपदम् 'अपक्षयविनाशाभ्यां परिणा-मर्धिजन्मभिः' इत्युक्तभावविकारान्तराणामुपलक्षणमिति च । एवञ्च पुण्यापुण्यजन्मद्वयस्यापि सुग्रहतया संकल्पनेत्यादिकमपि उभय-साधारणम् । अतः पुण्यविषयकसंकल्पादिपरमिव पापविषयक-संकल्पन-पतितादिस्पर्शनाभिचारहोमादिपरमपीष्यते । अत्र ग्रासा-म्बुवृष्ट्येत्यस्य विज्ञानभगवत्कृतं व्याख्यानमन्यापेक्षया आदरणीय-मस्ति । तद् यथा—'उत्कृष्टदेशकालपात्रेषु अन्नाम्बुनोरत्यादरेण दानमतिदानं पुण्यहेतुर्भवति ; विपरीतेष्वतिदानं पापहेतुः । अथवा योग्यायोग्येषु ग्रासप्रदानं पुण्यपापहेतुर्भवति, अम्बुदानञ्च । तथा वृष्टिः । वृश्चू छेदने । अनर्थनामनर्थोच्छेदनं पुण्यहेतुर्भवति ; अर्थवतामर्थोच्छेदनं पापहेतुः'—इति । (११)

स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति ।
क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः ॥ १२ ॥
अनाद्यनन्तं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १३ ॥
भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् ।

तेषु तेषु ब्राह्मणादिषु योनिषु [अनुक्रमेण ?] पर्यायेण प्रपद्यत इत्यर्थः ॥

स्थूलानीति । मशकमातङ्गादिस्थूलसूक्ष्मशरीराणि बहुविधान्यपि तत्तत्फलाभिसन्ध्यादिलक्षणरागादिरूपात्मगुणप्रयुक्तयागादिरूपक्रियालक्षणैर्गुणैर्हेतुभिर्भजते । तादृशात्मगुणयोगे च पूर्वपूर्वं कर्मैव हेतुर्दृष्ट इत्यर्थः ।

अनाद्यनन्तमिति । कलिलस्य कार्यस्य मध्ये स्थित्वा हिरण्यगर्भप्रजापत्याद्यनेकरूपतया विश्वस्य स्रष्टारमित्यर्थः । शिष्टं पूर्ववत् । (१३)

भावेति **भावग्राह्यं** भक्तिग्राह्यम् **अनीड**त्वेन अनिलयत्वेन

मशकमातङ्गेति । मातङ्गमशकेति भाव्यम् । एतदुत्पत्त्यनुगुण नियाविशेषो य कश्चिदपि यागादीत्यत्र विवक्षित । (१२)

एवमणु च—सृज्यमानत्वाभ्या जीव निरूप्य स्रष्टृत्वमहत्त्वाभ्या परमात्मन तद्वैलक्षण्य व्यनक्ति अनादीति । विश्वस्य परिवेष्टितार मिति परममहत्त्व ज्ञाप्यते । (१३)

'ये पूर्वं देवा ऋषयश्च तद् विदु , ते तन्मया अमृता वै बभूवु ' इति पूर्वं बहूनामेतदुपासनान्मुक्तिरासीदिति यदुक्तम् , तत् एवम्भूत जीवविलक्षणोपासनादेवेति निगमयति भावेति। 'भक्त्येवैकलभ्ये पुरुषे पुराणे' इत्युक्तरीत्या बाह्यसंभरणमप्रतीक्ष्य भक्तिमात्रेण सुग्रहत्व भावग्राह्यत्वम् । अनाधारेति । आधार शरीरादि । नीडपर्याय कुलायशब्द शरीरे प्रयुक्त 'बहिष्कुलायादमृतश्चरित्वा' इति । कला सर्गकर्तारमिति 'स प्राणमसृजत प्राणाच्छ्रद्धाम्—' इति प्रश्नषष्ठ-

कलासर्गकरं देवं येविदुस्ते जहुस्तनुम् [ति जहुस्तनुम्] ॥ १४ ॥

इति श्वेताश्वतरोपनिषदि पञ्चमोऽध्यायः ॥

अथ षष्ठोऽध्यायः ॥

स्वभावमेके कवयो वदन्ति कालं तथाऽन्ये परिमुह्यमानाः ।

अनाधारत्वेनाऽऽख्यायमानं विश्वस्य भावाभावकरं सर्गसंहारकारकं सर्वदा अशुभास्पृष्टं विद्यासर्गकारणं(कारिणं ?) ये पूर्वं ज्ञातवन्तः, ते प्रकृतिविनिर्मुक्ता बभूवुरित्यर्थः । [द्विरुक्तिरध्यायसमाप्त्यर्था ।] (१४)

इति पञ्चमाध्यायप्रकाशिका

पुनरपि परमात्मनो गुणान् वक्तुमध्यायान्तरारम्भः । स्वभावमिति । केचन लोकायतिकाः जगच्चक्रपरिवृत्तिहेतुं स्वभावं वदन्ति ।

स्पष्टोक्तप्राणादिकलाषोडशकस्रष्टृत्वं सुविवक्षम्। तेन षोडशकलजीववैलक्षण्यं वेदितं भवति । अथापि भावाभावकरमिति सर्वसृष्टिसंहारोक्त्या अर्थान्तरमाह विद्यासर्गेति । पूर्वमर्थसृष्टिरुक्ता, अनेन शब्देन च शब्दसृष्टिरिति विभागे तात्पर्यम् । विदुरिति पाठे, 'ये पूर्वं देवा ऋषयश्च तद् विदुः' इत्यत्रेव वर्तमानार्थविवक्षा । अस्तु वेह अविदुरिति पदच्छेदः । जहुरिति भूतकालनिर्देशात् । अविदुः= अज्ञानन् । (१४)

अन्तिमेऽस्मिन् षष्ठेऽध्याये पञ्चाध्याय्युक्तार्थानुवादपूर्वकं परमात्मगुणा अपि विशिष्य निर्दिश्यन्ते, 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च', 'धर्मावहं पापनुदं भगेशम्', 'एको देवः सर्वभूतेषु गूढः—' इत्यादिना । तदाह पुनरपि परमात्मनो गुणान् वक्तुमिति । भगवतः प्रपत्तिमात्रवशीकार्यत्वौपयिकं परमदयालुत्वादिकमप्यन्ते दृढाऽऽविष्क्रियते, यो ब्रह्माणं......'मुमुक्षुर्वै शरणमहं प्रपद्ये' इति । तत्र प्रथमेऽध्याये, 'कालः स्वभावो नियतिर्यदृच्छा...

देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ॥ १ ॥
येनावृतं नित्यमिदं हि सर्वं ज्ञः कालकालो गुणी सर्वविद्यः ।
तेनेशितं कर्म विवर्तते ह पृथ्व्याप्यतेजोनिलखानि चिन्त्यम् ॥ २ ॥

अन्ये भगवन्मायामोहिता कालकर्मादिकं वदन्ति । तदिदमौपनिषद परमपुरुषवरणीयताहेतुभूतगुणविशेषविरहिणा जल्पितम् । परमात्म महिम्नैव ब्रह्माश्रितं जगच्चक्रं बम्भ्रमीतीत्यर्थः । अथवा — ब्रह्म प्रकृतिः । प्रकृतिप्राकृतचक्रं बम्भ्रमीतीत्यर्थः । (१)

येनावृतमिति । यो नित्यः सर्ववस्तुव्यापकः सर्वज्ञः, 'कालः सपचते तत्र न कालस्तत्र वै प्रभुः' इत्युक्तरीत्या कालस्यापि पाचकः, 'तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः', सर्वज्ञानप्रकार(प्रकारज्ञान ?) वान्, तेनेशितं कर्म विवर्तते । क्रियत इति कर्मेति कार्यतया कर्म शब्दितं पञ्चभूतात्मकं जगत् तेन परमात्मना, स्यादिति सङ्कल्पमात्र विषयीकृतं सत् विवर्तते निष्पद्यत इत्येतदेव हृदि चिन्तनीयमित्यर्थः ।

चिन्त्यम्' इत्युक्तमिह प्रथममुपपाद्यते स्वभावमित्यारभ्य चिन्त्यमित्य न्तेन । तत्र प्रथममन्त्रेण कालः, स्वभावः इत्यनयोर्जगत्कारणत्वपक्षः प्रतिक्षिप्यते । देवस्यैष महिमेति । देवस्वरूप एव मुख्यं कारणम् । स्वभावादिकं तु तदधीनमिति भावः । (१)

अथ नियतिरपि देवप्रेरितेत्युच्यते येनेति । सर्वविद्य इत्यस्य सर्वा विद्या यस्य स इत्यर्थः । अथवा सर्ववित् यः इति च्छेदः । ज्ञः सर्वविदिति च, 'यः सर्वज्ञः सर्ववित्' इतिवदपुनरुक्तं भाव्यम् । तेनेशितं कर्मेत्यादि । कर्म जीवकृतं पुण्यपापात्मकं नियत्याख्यं तेन देवेन प्रेरितं सत् पृथ्व्यादिरूपेण विवर्तते । ह = प्रसिद्धमेतत् इत्यप्यर्थो घटते । कर्मशब्दस्य पृथ्व्याप्येत्यादिपदसामानाधिकरण्यात्यन्तसाम

तत्कर्म कृत्वा विनिवर्त्य भूयस्तत्त्वस्य तत्त्वेन समेत्य योगम् ।
एकेन द्वाभ्यां त्रिभिरष्टभिर्वा कालेन चैवाऽऽत्मगुणैश्च सूक्ष्मैः ॥ ३ ॥
आरभ्य कर्माणि गुणान्वितानि भावांश्च सर्वान् विनियोजयेद् यः ।
तेषामभावे कृतकर्मनाशः कर्मक्षये याति स तत्त्वतोऽन्यः ॥ ४ ॥

तत्कर्मेत्यादि । 'तत्त्वं नारायणः' इति श्रुतेर्नारायण एव तत्त्वम् । ततश्चायमर्थः—इतरेभ्यो विनिवर्त्य तत्त्वस्य भगवतः समाराधनं नित्यनैमित्तिकलक्षणं कर्म भूयः कृत्वा, एकेन जायमानदशाप्रसूतभगवत्कटाक्षेण, द्वाभ्याम्, 'यस्य देवे परा भक्तिः यथा देवे तथा गुरौ' इत्युक्तरीत्या देवगुरुभक्तिभ्याम्, त्रिभिः बाल्यपाण्डित्यमौनैः, अष्टभिर्योगाङ्गैश्च... [१] सहितस्सन् तत्त्वेन परमात्मना शेषत्वज्ञानलक्षणयोगं प्राप्य प्रारब्धत्वगुणयुक्तानि कर्माण्यवलम्ब्य वर्तमानान् सर्वान् भावान् कामान् स्वस्मै विनियोजयति=भुङ्क्ते । स तेषां कर्म

क्रियत्वसंपिपादयिषया तु क्रियत इति कर्मेति व्युत्पत्तिराश्रिता, "यस्य वैतत् कर्म" इति श्रुताविव । पृथ्व्याप्येति पदेन भूतानि स्वतन्त्राणि जगत्कारणमिति पक्षोऽपि व्युदस्तो भाव्यः । चिन्त्यमित्यस्य इति निर्णयमित्यर्थः । (२)

तत्कर्मेत्यादिना, 'स तत्त्वतोऽन्यः' इत्यन्तेन जीवापरपर्यायस्य पुरुषस्य कारणत्वपक्षो व्युदस्यते । शाङ्करीत्या तु तत्कर्मेति श्लोकः उत्तरश्लोकानन्वितः पृथग्वाक्यम् । तदर्थरीतिरेव परिष्करणीया—तत् पूर्वोक्तं कर्म समष्टिकार्यजातं पृथ्वीपर्यन्तं कृत्वा विनिवर्त्य समष्टिकरणादात्मानं निवर्त्य एकस्य तत्त्वस्य सूक्ष्मापरेण तत्त्वेन योगं सयायेति। कतिभिस्तत्त्वैरिति विचारे पञ्चीकरणवत् अग्नीकरणप्रक्रिया वक्तुम् एकेन द्वाभ्यां त्रिभिरित्यनयवतोऽनुवादपूर्वकम् अष्टभिर्वेति अष्टानां प्रकृतीनां मिथस्समेलनरूपाग्नीकरणपक्षे आदरः प्रदर्श्यते

आदिः स संयोगनिमित्तहेतुः परस्त्रिकालादकलोऽपि दृष्टः ।
तं विश्वरूपं भवभूतमीड्यं देवं स्वचित्तस्थमुपास्य पूर्वम् ॥ ५ ॥

फलभोगानामवसाने फलापवर्गितया कर्मणा नाशात्, 'तस्य तावदेव चिरम्' इत्युक्तरीत्या कर्मक्षये ब्रह्म **याति** प्राप्नोति । स तत्त्वतः परमात्मनोऽन्य एव । अतो नैक्यशङ्का कार्येति भावः । (३)

परमात्मोपासनमपि स्वात्मोपासनपूर्वकं कर्तव्यमित्याह **आदि**रिति । सः पूर्वमन्त्रोक्तजीवः **संयोगे** समीचीनपरमात्मयोगे तत्प्राप्तौ

एव कालेन कारणभूतेन आत्मगुणैश्च रागद्वेषादिभिः सहायैः व्यष्टिं कुरुते देव इति ।

विज्ञानभगवतोऽत्र व्याख्यानशैली प्रायोऽसङ्गाप्यानुरोधिन्येव लक्ष्यते । तत्कर्मेत्यस्य तदर्थं कर्म तत्कर्म भगवदाराधनरूपं कर्मेति तत्र व्याख्यानम् । एवमपि सुवचम्—तत् पूर्वोक्तं पृथ्व्याप्यादिजगद्विवर्तोपयोगि भोगप्रदं काम्यं कर्म बहोः कालात् कृत्वा, भूयः पश्चात् तादृशकर्मकरणादात्मानं विनिवर्त्य, आत्मनस्तत्त्वस्य ब्रह्मतत्त्वेन योगं शेषशेषिभावात्मकं बुद्ध्वा, अन्यविधानि सात्त्विकत्यागरूपगुणान्वितानि आरभ्य सर्वं तत्रोपयोजयेत् यः इत्येवम् ।

कश्चित्तु, 'एकेन द्वाभ्यां त्रिभिरष्टभिर्वा जन्मभिर्यथायथं तत्तद्भाग्यपरिपाककालानुरोधेन' इति एकेनेत्याद्यंशं व्याख्याति ।

कृतकर्मनाश इत्यस्य कृतः=एव निष्पादितः कर्मनाशो येनेति विग्रहेण स इत्येतद्विशेषणत्वं भाव्यम् । स तत्त्वतोऽन्य इत्यनेन, एवमंशो भूत्वा सांसारिकं कर्म कृत्वा क्लेशमनुभूय विरज्य सत्कर्मकरणेन भगवत्तत्त्वमाराध्य मुक्तिं प्राप्तुं प्रयस्यतः पुरुषस्य कथं जगत्कारणतत्त्वनासंभव इति प्रदर्शितमिति ध्येयम् । (३ ४)

आदिरित्यादेः परमात्मपरतया योजना एवं भवेत्—'संयोग एषां न त्वात्मभावात्' इति प्रागुक्ततया संयोगनिमित्ततयाऽभि-

स वृक्षकालाकृतिभिः परोऽन्यो यस्मात् प्रपञ्चः परिवर्ततेऽयम् ।
धर्मावहं पापनुदं भगेशं ज्ञात्वाऽऽत्मस्थममृतं विश्वधाम ॥ ६ ॥

आदिः कारणम्–प्रधानहेतुरिति यावत्–, कालत्रयपरिच्छिन्नात् परत्वेन भिन्नत्वेन निरवयवत्वेन शास्त्रदृष्टः । तं कर्मवशादनन्तशरीरं भवभूतं भवं संसारं भूतं प्राप्तम्–संसारिणमिति यावत्–, ईड्यं स्तुत्यम्–अपहतपाप्मत्वादिगुणकमिति यावत्—, अत एव देवं द्योतमानं स्वप्रकाशज्ञानानन्दरूपं स्वहृदयस्थं प्रथमत उपास्य—,

स वृक्षेति । यस्मादयं चिदचित्प्रपञ्चः परिवर्तते, स वृक्षकालाकृतिभ्यः परः उत्कृष्टः—वृक्षशब्देन छेदनार्हप्रकृतिप्राकृतमुच्यते— आ समन्तात् कृतिः यत्नो यस्येति आकृतिः कर्ता जीवः । प्रकृतिकालजीवेभ्य उत्कृष्ट इत्यर्थः । ज्ञानोत्पत्तिप्रतिबन्धकपापानि अपनुद्य

मतानामपि आदिहेतुर्देव एव कालत्रयपरिच्छिन्नादन्योऽनवयव इति । तथासति तं देवं पूर्वमुपास्य, तदनन्तरं विश्वधाम आत्मस्थं ज्ञात्वेति उपरितनवाक्यार्थान्वयः प्रसजति । अतः आदिरिति मन्त्रः पूर्वप्रकृतजीवपरतयैव व्याख्यातः । कठोपनिषदि (१-१७) 'ब्रह्मजज्ञं देवमीड्यं विदित्वा' इत्यत्र, "जीवात्मानमुपासकं ब्रह्मात्मकत्वेनावगम्य" इति भाष्यकृता व्याख्यानात् तद्रीत्या इहापि ईड्यं देवमिति ब्रह्मात्मकत्वविवक्षाऽपि भवेत् । (५)

एवं स्वभावकालकर्मपञ्चभूतजीवेभ्यः प्रस्तुतेभ्योऽन्यः परमात्मा ज्ञातव्य उच्यते स वृक्षकालाकृतिभिरिति । वृक्षेति 'ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः' इति कठोक्तं प्रत्यभिज्ञाप्यते। अकृतिशब्दस्याऽऽकाररूपार्थविवक्षायां वैयर्थ्यात् प्रकृतजीवपरतया संभवति सार्थक्ये तत्त्यागायोगाच्च तदुचितमर्थमाह आ समन्तादिति। तृतीया, 'अन्यदेवाहुर्विद्यया' इत्यादाविव पञ्चम्यर्थे । ज्ञात्वेत्यस्य

तमीश्वराणां परमं महेश्वरं तं देवतानां परमञ्च दैवतम् ।
पतिं पतीनां परमं परस्ताद् विदाम देवं भुवनेशमीड्यम् ॥ ७ ॥

तदनुकूलपुण्यप्रवर्तकम्, भगेशम्—"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा" इत्युक्तानां ज्ञानादीनामीश्वरं विश्वस्य धामभूतमाधारभूतं मरणाद्यवद्यशून्यं स्वात्मनि अन्तर्यामितया वर्तमानं ज्ञात्वा मुक्तो भवतीत्यर्थः । (५-६)

तमीश्वराणामिति । विदामेति ज्ञानप्रार्थना । शिष्टं स्पष्टम् । (७)

उत्तरमन्त्रे विदामेत्यत्रान्वयो न भवति । ज्ञानवेदनकर्मणोरैक्यत्वेन ज्ञानवेदनयोरप्यैक्यात् क्त्वाप्रत्ययानुपपत्तेः । न च ज्ञानमिदं वाक्यार्थज्ञानमात्रम्, वेदनं तु ध्यानमिति वाच्यम्; वाक्यार्थज्ञाने जीवोपासनानन्तरभावित्वनियमाभावेन पूर्वमुपास्येत्युक्तानन्तर्यानन्वयात् । अतो मुक्तो भवतीत्यध्याहृत्य पृथग्वाक्यकरणम् ।

ननु आदिरित्यादि सर्वं परमात्मपरमेवास्तु । तत्र स्वचित्तस्थत्वेन तस्य (विग्रहविशिष्टस्य) उपासनं पूर्वमुच्यते । अथ शास्त्रस्थत्वेन सर्वविधिभूतिविशिष्टतया वेदनं परज्ञानरूपं मुक्तिप्राक्कालिकं प्रार्थ्यते । तथाच मुक्तो भवतीति मा भूदध्याहारः । अथवा ज्ञात्वेति ज्ञानं आलम्बनसंशीलनरूपमस्तु, विदामेति चोपासनमिति चेत्— किमनेन प्रश्नेन? यत्र सौष्ठवम्, तदाद्रियतां सम्यग् विमृश्य । (६)

महेश्वरमिति न रूढ्यर्थरुद्रविवक्षासंभवः, तदा पारस्यानन्वयात् । देवतामध्ये परमदेवतात्वस्य पतिमध्ये परमपतित्वस्य चेव ईश्वरमध्ये परमेश्वरत्वस्यात्र कथ्यमानतायाः साहचर्यबलसिद्धतया परममहेश्वरपदान्तर्गतेश्वरशब्दस्य यौगिकत्वावधारणादिति हि श्रुतप्रकाशिकोक्तमुपरि अनुवदिष्यति । महेश्वरमित्यत्र महत्त्वम् अविवक्षितं वस्तुस्थित्यनुवादमात्रम् । अस्तु वा ईश्वराणामिति पदं महेश्वराणामित्यर्थकम् । 'ईश्वराणां मध्ये परमत्वात् महेश्वरः,

न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते ।
पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥ ८ ॥
न तस्य कश्चित् पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् ।
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ॥ ९ ॥
यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावतः ।
देव एकः समावृणोति स नो दधाद् ब्रह्माप्ययम् ॥ १० ॥

न तस्येति। कार्यं शरीरम्। **कारणम्** इन्द्रियम्। ज्ञानबलाभ्यां सहिता सृष्टिसंहारादिलक्षणक्रिया **ज्ञानबलक्रिया**। शिष्टं स्पष्टम्। (८)

न तस्य कश्चिदिति। लिङ्गं ज्ञापकहेतुः। **करणाधिपः**— जीवः। शेषमतिरोहितार्थम्। (९)

य इति। लूताख्यः कीटविशेषः स्वसंनिहितजन्तुविशेषं यथा तन्तुभिरावृणोति, एवं प्रकृतिजैः प्राकृतैः तत्त्वैः **स्वभावतः** स्वेच्छातः चिद्वर्गमा**वृणोति** लुप्तज्ञानं करोति [यः ?], स देवोऽस्माकं ब्रह्मणि **अप्ययम्** आत्यन्तिकं लयं करोतु। मुक्तस्य ब्रह्मण्यप्ययो नाम भेदकाकारास्फुरणम्।

देवतानां मध्ये परमत्वात् दैवतभूतः; देवतैव दैवतमिति व्युत्पत्त्या अस्य देवतात्वं नियतम्; अन्येषां तु मनुष्यादिकिञ्चिदपेक्षया देवतात्वम्, उत्कृष्टापेक्षा च तदभावः; अस्यापि चेति देवतात्वं न नियतमिति वाक्यार्थवर्णनेऽपि, महेश्वरपदस्य महांश्चासौ ईश्वरश्च महेश्वर इति योगार्थ एव विवक्षितो भवतीति ध्येयम्। (७)

यस्तन्तुनाभ इवेति तन्तुनाभदृष्टान्तेन–जन्तूनां स्वात्मनि लयसंपादनायैव तन्तुनाभः तन्तून् निर्माय वितनोति यथा, तथा देवोऽपि अन्ततो जीवानां स्वात्मनि अप्ययरूपमोक्षप्रापणाय स्वशरीरात् प्रधानात् तन्तुतुल्यानि महदादीनि कार्याणि सृष्ट्वा विस्तृणातीति दर्शितम्।

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥ ११ ॥
एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥ १२ ॥
नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।

एको देव इति । सर्वभूतेषु इतराविदिततया वर्तमान, सर्वव्यापितया **सर्वभूतात्मा**, तच्छरीरेष्वनुप्रविष्ट, कर्मसु प्रेरक, **चेता**—'चिन् चयन' इति हि धातु —सकलप्रपञ्चनिर्माता, त(अ)थापि गुणत्रयवश्यत्वाभावात् फलाभिसन्धिपूर्वककर्तृत्वाभावेन [च ?] (?) केवलोदासीन, ईश (?), (**देव एकः ?**) 'अपहतपाप्मा दिव्यो देव एको नारायणः' इति प्रसिद्धो दिव्यो देव एक एवेत्यर्थ । (११)

एको वशीति । **निष्क्रियाणां** स्वत प्रवृत्तिरहिताना सर्वचेतनाना **वशी**-स्वाधीनसर्वचेतनवर्ग इति यावत्—, एक जगद्बीजम व्यक्तलक्षणं महदहङ्कारादिरूपेण यो बहुधा करोति, त स्वान्तर्यामिण ये जानन्ति, त एव **मुक्ता** भवन्तीत्यर्थ । (१२)

नित्य इति । अनित्याना चेतनाना बहूना नित्य एक एव चेतनस्सन् [य. ?] कामान् विदधाति, तज्ज्ञानं मुक्ति [हेतु ?] रित्यर्थ । अत्र नित्यचेतनानामनित्यत्व धर्मभूतज्ञानसङ्कोचादिधर्मयोगादिति द्रष्टव्यम् । नित्याना मध्ये नित्य अत्यन्तनित्य, चेतनाना मध्ये चेतन-

नित्यो नित्यानामित्यत्र नित्यानामिति पदच्छेद एव भगवद्भाष्यकारदर्शितः । तथैव च कठोपनिषदि एषां व्याख्यानमपि । इह तु, स नो दद्यात् ब्रह्माप्ययमिति जीवानामप्ययस्योक्तत्वात् किञ्चिद्रूपेण

तत् कारण साख्ययोगाधिगम्य ज्ञात्वा देव मुच्यते सर्वपाशै ॥१३॥
न तत्र सूर्यो भाति न चन्द्रतारक नेमा विद्युतो भान्ति कुतोऽयमग्नि ।
तमेव भान्तमनु भाति सर्व तस्य भासा सर्वमिद विभाति ॥ १४ ॥
एको हसो भुवनस्यास्य मध्ये स एवाग्नि सलिले संनिविष्ट ।
तमेव विदित्वाऽति मृत्युमेति नान्य पन्था विद्यतेऽयनाय ॥ १५ ॥

परमचेतन इत्यर्थाश्रयणेऽपि न दोष । नित्यत्वचेतनत्वतारतम्यञ्च विवक्षाविशेषेण द्रष्टव्यम् । **साख्ययोगाधिगम्य** साख्ययोगशास्त्रयो तात्पर्यविषयभूतम् । 'साख्य योग पाञ्चरात्र वेदा पाशुपत तथा । आत्मप्रमाणान्येतानि' इत्युक्तेरिति भाव । (१३)

न तत्रेति । अय मन्त्रोऽन्यत्र बहुकृत्वो व्याकृत । (१४)

एक इति । **भुवनस्य** चिदचित्प्रपञ्चस्य मध्ये, पक्षिसघे राजहसवत् विराजमान । 'यमन्तस्समुद्रे कवयो वदन्ति' इति समुद्रसलिलसंनिविष्ट । स एव अग्नि अग्रनेता मोक्षप्रद , ससारपाशदाहक इति वाऽर्थ । शिष्ट स्पष्टम् । (१५)

अनित्यत्वस्य जीवेषु वर्णनसभवात् पराभिमतस्य अनित्यानामिति पदविभागस्य स्वीकारेऽपि नातीव हानिरिति व्युत्पादनाय प्रकारान्तरेण व्याख्यानमिति ध्येयम् । अव्ययश्रवणादनित्य व न मन्तव्यमिति श्रुतिर्नित्यानामिति नित्यत्व वर्क्तात्यपि स्यात् ।

साख्ययोगाधिगम्यमित्यस्य ज्ञानयोगकर्मयोगाभ्यामधिगम्य-मित्यप्यर्थ स्यात् । 'साख्ययोगौ पृथग्बाला ' इत्य दौ गीतासु तथा प्रसिद्धे । परतु तदा जीवसाक्षात्कारद्वारा तत् निर्वाह्यम् । (१३)

न तत्र सूर्य इति मन्त्र कठवल्ल्या मुण्डके च श्रूयते । (१४)

स विश्वकृत् विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः ।
प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः ॥ १६ ॥
स तन्मयो ह्यमृत ईशसंस्थो ज्ञः सर्वगो भुवनस्यास्य गोप्ता ।
य ईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय ॥ १७ ॥

स विश्वेति । **विश्वकृत्** सर्वकर्ता, **विश्वचित्** सर्वं प्राप्त,— विदिर्लाभ इति हि धातु, । **आत्मयोनि** –आत्मा योनि स्थान यस्य स तथोक्त । जीवान्तर्यामीत्यर्थ । **ज्ञः** सर्वज्ञ, **कालकालः** कालस्यापि नियन्ता, **सर्वविद्यः** सर्वविद्याप्रवर्तक, **प्रधानक्षेत्रज्ञपतिः** प्रकृतिजीवयो शेषी, **गुणेशः** ज्ञानादिषाड्गुण्यपरिपूर्ण, **संसारस्य** प्रकृतिसंबन्धलक्षणस्य मोक्षे च तत्स्थितौ च हेतुरित्यर्थ । (१६)

स तन्मय इति । **सः** परमात्मा **तन्मयः** तत्प्रचुर । तदात्मक एव, नान्यात्मक । अनन्यप्रेर्य इति यावत् । **अमृतः** असंसारी । **ईशे** ईशनव्यापारे सम्यक् स्थितिर्यस्येति तथोक्त । **य ईशे** यो नित्यमीष्टे । *यस्य चेतनमनन्यहेतुक* **नित्यम्** *। मोक्षदशायामप्यनपायीत्यर्थ* । शिष्ट स्पष्टम् । (१७)

संसारमोक्षस्थितिबन्धहेतुरिति । संसारेति पद स्थितावप्यन्वेतीत्याशयेन संसारस्येति संबन्धसामान्यषष्ठीविग्रहादरणम् । अर्थस्तु संसारान्मोक्षे, संसारस्थितिरूपे सर्गकालिकावस्थाने, प्रलयसाधारणे बन्धे च हेतुरिति, (१६)

तन्मय इत्यत्र तच्छब्द स इत्युक्तपरामर्शी भवतु अत्यन्तसंनिहितत्वादित्यभिसंधायाह तदात्मक एवेति । व्यवहितग्रहणेऽपि तु प्रधानक्षेत्रज्ञमय इत्येवरीत्याऽपि व्याख्यान भवति । (१७)

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तँ ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ १८ ॥
निष्कलं निष्क्रियँ शान्तं निरवद्यं निरञ्जनम् ।

'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः' इति वशीकार्यपरम्पराविश्रान्तिभूमिभूतभगवद्वशीकरणोपायभूतप्रपदनमन्त्रमाह — **यो ब्रह्माणमिति** । यः स्वनाभिपद्मे ब्रह्माणमुत्पाद्य तस्य वेदप्रदानेन जगत्सर्गशक्तिमाहितवान्, तं स्वविषयबुद्धिप्रकाशहेतुं मुमुक्षुरहं शरणं प्रपद्य इत्यर्थ. । आत्मबुद्धेः प्रकाशो यस्मात् स **आत्मबुद्धिप्रकाशः** । तद्विषयबुद्धिस्फुरणस्य तदनुग्रहायत्तत्वादित्यर्थः । (१८)

उक्तब्रह्मज्ञानाभावे मोक्षसंभावनैव नास्तीत्याह **निष्कलमिति** मन्त्रद्वयेन । आकाशस्य चर्मकटादिवत् वेष्टनं यदा अल्पशक्तयो मनुष्याः करिष्यन्ति, तदा **निष्कलं** निरवयवं **निष्क्रियं** कृतकृत्यं **शान्तम्** अशनायाद्यूर्मिषट्करहितं **निरवद्यम्** आश्रितपराङ्मुखत्वाद्य-

---

भक्त्या भगवतः प्राप्यत्वमेतावदुक्तम् । प्रपत्त्याऽपि प्राप्योऽयमिति रहस्योपदेशः क्रियते यो ब्रह्माणमिति । प्रपदनमन्त्रमिति । मन्त्ररत्नवत् अस्यापि प्रपद्ये इति उत्तमपुरुषवर्तमानापदेशघटितत्वात् प्रपदनैककरणमन्त्रत्वम् । भक्त्यङ्गस्वतन्त्रोभयविधप्रपत्तिपरमिदमविशेषादिति स्तोत्रभाष्यादितो ज्ञेयम् । आत्मबुद्धिप्रकाशमिति पदेन मधुकैटभापहृतवेदपुनरर्पणविहितोऽनुग्रहोऽपि सूच्यते । आत्मपदं स्वपर्यायित्वात् देवपरम् । यथायथं ज्ञानदर्शनप्राप्तिहेतुर्हि सः ॥

यथा भक्त्यभावेऽपि प्रपत्तिवशान्मुक्तिरधिकारिविशेषे, तथा तदभावेऽपि ज्ञानात्मकोपायनिरपेक्ष एव कश्चित् स मुक्तिप्रदः स्यात्; अन्यतोऽपि वा मुक्तिः स्यादिति कश्चिन्मन्येत । तन्निरसनाय

अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ॥ १९ ॥
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥ २० ॥
तपःप्रभावाद् देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् ।
अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम् ॥ २१ ॥
वेदान्ते परमं गुह्यं पुरा कल्पे प्रचोदितम् ।
नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वा पुनः ॥ २२ ॥

वयरहितं निरञ्जनम् असङ्गस्वभावम् अमृतस्य मोक्षस्य परं मुख्यं दग्धेन्धनानलवत् स्वप्रकाशकं देवमविज्ञाय दुःखस्य नाशो भवति । यथा आकाशस्य चर्मवत् वेष्टनमसंभावितम्, एवं परमात्मज्ञानमन्तरेण मोक्षोऽसंभावित इत्यर्थः । (१९-२०)

तप इति । 'मनसश्चेन्द्रियाणाञ्च ऐकाग्र्यं परमं तपः' इत्युक्तचित्तैकाग्र्यलक्षणतपःप्रभावाच्च[त् परमात्मानुग्रहाच्च ¹] संपन्नब्रह्मविज्ञानः श्वेताश्वतरनामा ऋषिः अत्याश्रमिभ्यः—अति पूजायाम्—पूज्याश्रमयुक्तेभ्यः परमहंससंन्यासिभ्यः, ऋषिसंघैः वामदेवादिभिः जुष्टं सेवितं परमं पवित्रं ब्रह्म प्रोवाचेत्यर्थः । (२१)

वेदान्त इति । वेदान्तेष्वतिरहस्यतया निगूढं पुरा कल्पे ब्रह्मणे उपदिष्टमेतत् विज्ञानं शान्तेभ्यः पुत्रेभ्यः शिष्येभ्य एव प्रब्रूयात्; नान्येभ्यः इत्यर्थः । (२२)

निष्कलमित्यादिमन्त्रद्वयम् । अविज्ञायेत्यत्र समानकर्तृकत्वाविवक्षा ।
अत्याश्रमिभ्य इत्यस्य अतिशयिताश्रमशालिभ्य इत्यर्थः। 'अनाश्रमी न तिष्ठेत्तु क्षणमेकमपि द्विजः' इति अनाश्रमावस्थानस्य निषिद्धतया तादृशानामुत्तमपात्रतया ग्रहणायोगादित्याशयेन अति पूजायामित्युक्तम्।

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः प्रकाशन्ते महात्मनः इति ॥

॥ ओं 'पूर्णमदः,' 'भद्रं कर्णेभिः,' 'सह नाववतु' इति शान्तिः ॥

। इति श्वेताश्वतरोपनिषदि षष्ठोऽध्यायः ।

॥ इति श्वेताश्वतरोपनिषत् ॥

शुभमस्तु

भगवद्विषये गुरुविषये च उत्कृष्टभक्तिशून्यानाम् उक्तार्थो उपदिष्टा अपि दुर्ज्ञाना इत्याह यस्य देव इति । यस्य भगवत्युत्कृष्टा भक्तिः, तत्तुल्या गुरावपि भक्तिः, तस्यैव महात्मन एते अर्था भासन्ते; नेतरेषामित्यर्थः । द्विरुक्तिरध्यायसमाप्त्यर्था [आदरार्था च] ।

एतदध्यायान्तर्गतवाक्यविषयमधिकरणं लिख्यते—

तृतीयाध्याये उभयलिङ्गपादे—, वेदान्ते जगत्कारणतया प्रतिपाद्यमानस्यात्मनः, 'अथ य आत्मा स सेतुर्विधृतिः' इति सेतुत्वश्रवणात् सेतोश्च प्राप्यान्तरप्रापकत्वस्यैव दर्शनेन ब्रह्मणोऽपि प्राप्यान्तरप्रापकत्वैव [प्रतीयते] ; न तु स्वयं प्राप्यता । किञ्च-'एतं सेतुं तीर्त्वा' इति तरितव्यत्वाभिधानेन एतस्य प्राप्यत्वाभावाविष्करणात् वेदान्तेषु, 'चतुष्पात् ब्रह्म षोडशकलम्' इत्युन्मानश्रवणात् नेदमपरिमितम्, अपरिमितस्यो-

---

मूले हीति पर्यायें । तेन तस्यैवेत्यर्थलाभः । एतदनुसारेण व्यतिरेकमुखेनावतरणं कृतम् । कथिता इत्यस्य अत्रोपनिषदि उक्ता इत्यर्थः । अकथिताः साक्षादाचार्यानुक्ता अर्थाः त्वर्थोऽपि अत्रेष्यते । अनुग्रहमात्रेणार्थस्फुरणात् । भक्तिमात्रेण च फलव्यस्य फलसिद्धिः ।

षोडशकलमिति । नेदं श्रौतं पदम् । किंतु सत्यकामं प्रत्युपदिष्टायां षोडशकलब्रह्मविद्यायां चतुरः पादान् प्रदर्श्य प्रतिपादं

न्मानासम्भवात् । अतो वेदान्तेषु अपरिमितत्वेन प्रतीयमानमन्यदेवेति प्रतीयते । किञ्च—'अमृतस्य पर सेतुम्' इति अमृतस्य वस्त्वन्तरस्य प्राप्यप्रापकत्वलक्षण सम्बन्ध षष्ठ्या प्रतीयते । न हि स्वस्मिन्नेव प्राप्यप्रापकत्वलक्षण सम्बन्ध सम्भवति। किञ्च-'तेनेद पूर्ण पुरुषेण सर्वम्' इति प्रतिपादितपुरुषादपि, 'ततो यदुत्तरतरम्' इत्यधिकस्य निर्देशात् परस्मादपि ब्रह्मण परमन्यत् व्यपदिश्यते । अत एभ्यो हेतुभ्य परस्मादपि ब्रह्मण अन्यत् परमभ्युपगन्तव्यमिति, "परमत सेतून्मानसम्बन्धभेद व्यपदेशेभ्य" इति सूत्रेण पूर्वपक्षे प्राप्ते उच्यते—

'सामान्यात्तु' । 'य आत्मा सेतु' इति व्यपदेश, 'एषा लोकानामसम्भेदाय' इति वाक्यशेषश्रुतासंकरकारित्वलक्षणधर्मसामान्यनिबन्धन , न तु प्राप्यान्तरप्रापकत्वलक्षणधर्मनिबन्धन। 'एत सेतु तीर्त्वा' इत्यत्र तरतिश्च प्राप्तिवचन , वेदान्त तरतीतिवत् , नोल्लङ्घनवचन ।

यदुक्तमुन्मानव्यपदेशादस्य परिमितत्व प्रतीयत इति, तत्राह, "बुद्ध्यर्थ पादवत्"। यथा 'मनो ब्रह्मेत्युपासीतेत्यध्यात्मम् , 'तदेतत् चतुष्पाद्

चतुष्फलत्वमुक्तमिति अर्थसिद्धकथनमेतत् । वस्त्वन्तरस्येति । वस्त्वन्तर प्रतीत्यर्थ ।

मनसो वागादिपादत्वासम्भवादिति । निखिलजगत्कारणस्य ब्रह्मणो वागादिमात्रपादायोगात् इद चतुष्पात्त्व तस्य नूनमुपासनार्थमिति निश्चितम् , तथैव षोडशकलस्थलेऽपीति भाष्यादितो ज्ञायते । अत्र तु मनो ब्रह्मेत्युपासीतेति वाक्ये ब्रह्मणीव मनस्यपि चतुष्पात्त्व न वास्तवम् , किंतु उपासनार्थं कल्पितमित्यधिकमुक्तमिति ध्येयम् । अन्ततो भाष्यतात्पर्यमप्येतदेव वा ।

ब्रह्म । वाक् पाद प्राण पाद चक्षु पाद श्रोत्र पाद इत्यध्यात्मम्' इत्यत्र ब्रह्मप्रतीकभूतमन आदौ वागादिपादत्वव्यपदेश उपासनार्थ, न तु तात्त्विक, मनसो वागादिपादत्वासभवात्—एकमपरिच्छिन्नस्य ब्रह्मण, 'प्राची दिक् कला, प्रतीची दिक् कला, दक्षिणा दिक् कला, उदीची दिक् कला । एष वै सोम्य चतुष्कल पादो ब्रह्मण प्रकाशवान् नाम' इत्युक्तदिगादिलक्षणचतुष्कलपादसन्धानासभवादुपासनार्थ एव।

ननु स्वयमनुन्मितस्य कथमुपासनार्थतयाऽप्युन्मानप्रतीति ? तत्राह, "स्थानविशेषात् प्रकाशादिवत्"। यथा प्रकाशाकाशादेरपरिच्छिन्नस्यापि वातायनाद्युपाधिवशेन परिच्छिन्नत्वानुसन्धानम्, एवमिहापि अभिव्यक्तिस्थानभूतप्रा(वा ?)गाद्युपाधिवशेन उन्मितत्वानुसन्धानमुपपद्यते ।

• यदुक्तम्, 'अमृतस्य पर सेतुम्' इति सबन्धव्यपदेशेन अमृतात् भेदोऽवगम्यत इति । तत्राह, "उपपत्तेश्च" । 'यमेवैष वृणुते तेन लभ्य' इति 'स्वप्राप्ते स्वयमेव साधनतया जोघुष्यमाणे ब्रह्मणि स्वेनैव प्राप्यप्रापकत्वलक्षणसबन्ध यपदेशस्यापि नानुपपत्ति ।

वातायनादीति । प्रकाशस्य वातायनेन परिच्छिन्नत्वम्, आकाशस्य च घटादिना । अभिव्यक्तिस्थानभूतवागाद्युपाधीति पाठो युक्त न तु प्रागादीति । श्रुतप्रकाशादिकायाम्, 'स्थानभूतवागादिविषयमिद सूत्रम्' इत्युक्तत्वात् । षोडशकलत्वाधिय ब्रह्मणि उपासनार्थमुक्तम्, वागादिपादत्वदित्युक्त कथमुपपद्यत, अनुन्मितवागादिपादोन्मानस्याप्ययोगादिति शङ्कापरिहारार्थं सूत्रमिति तदर्थ ।

यमेवैष इति । ननु यमेवैष इति वाक्य निरतिशयप्रीतिरूपापन्नध्यानलभ्यत्वस्य ब्रह्मणि बोधनार्थमिति जिज्ञासाधिकरणभाष्ये

यदुक्तम् 'ततो यदुत्तरतरम्' इति अधिकं वस्तु प्रतिपाद्यत इति, तत्राह, "तथाऽन्यप्रतिषेधात्"। 'यस्मात् परं नापरमस्ति' इति तदतिरिक्तोत्कृष्टवस्तुनो निषेधेन तद्विरुद्धतया, 'ततो यदुत्तरतरम्' इति वाक्ये तदधिकवस्तूपदेशासंभवात्, ततो यदुत्तरतरमित्येतत् पूर्वोप-(पूर्वप्रति)पादितस्य पुरुषपारम्यस्य उपरि उपसंहाररूपम्। एतच्च पूर्वत्र तन्मन्त्रव्याख्यायां स्पष्टीकृतम्।

"अनेन सर्वगतत्वमायामशब्दादिभ्यः"। अनेन=ब्रह्मणा सर्वगतत्वं=सर्वस्य जगतो व्याप्तत्वम् आयामशब्दादिभ्योऽवगम्यते। आयामशब्दस्तावत्—'तेनेदं पूर्णं पुरुषेण सर्वम्', 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायण स्थित' इत्यादि। आदिशब्देन, 'ब्रह्मैवेदं सर्वम्' इत्यादयो गृह्यन्ते। अतो न परब्रह्मणोऽन्यत् प्राप्यमस्तीति स्थितम्॥

अस्याश्चोपनिषदः कृत्स्नाया भगवत्परत्वं सर्वव्याख्यानाधिकरणे

स्पष्टमिति कथमस्यान्त्योपायत्वमनेन बोध्यत इत्युच्यत इति चेन्न— तृतीयपादेन प्रीतिरूपापन्नभक्तिलभ्यत्वमुक्तम्। यमेवेति प्रकारेण वृतेनैव लभ्य इति कथनात् वरणाभावे अलभ्य इति ज्ञापनात् वरणकारणजिज्ञासायां प्रियतमत्वस्य वरणहेतुताया आनुभविकत्वात् प्रियतमत्वं प्रति प्रीत्यतिशयभाक्त्वस्य हेतुरित्यस्य गीतन्यायाच्च प्रीतिरूपापन्नध्यानलाभात्। एवमपि प्रापकस्यास्यैव प्राप्यत्वमपि लभ्य इति पदेन दर्शितमेव। स्पष्टीकृतञ्चेदं चतुर्थपादेन 'तस्यैष आत्मा विवृणुते तनूं स्वाम्' इत्यनेनेत्याशयात्।

सर्वव्याख्यानाधिकरणटीकायामस्या अप्युपनिषदो भगवत्परत्वस्थापनं रुद्रपरत्वभ्रमव्युदासाय कृतं जिज्ञासुशिक्षणसौकर्याय प्रायः शब्दतः पुनरनुवदितुमारभते अस्याश्चेति॥

व्यासार्यैः समर्थितम् । तदुच्यते—प्रथमद्वितीयखण्डयोः, **देवात्मशक्तिम्**, **व्यक्ताऽव्यक्तं भरते विश्वमीशः**, **यदात्मतत्त्वेन तु ब्रह्मतत्त्वम्**, **ज्ञात्वा देवम्**, **एष हि देवः प्रदिशोऽनु सर्वाः** इति देवात्मेशब्रह्मशब्दैः परमात्मा निर्दिश्यते । ते च शब्दाः 'अपहतपाप्मा दिव्यो देव एको नारायणः', 'विश्वं नारायणं देवम्', 'आत्मा नारायणः परः', 'अङ्गुष्ठमात्रः पुरोऽङ्गुष्ठञ्च समाश्रितः । ईशः सर्वस्य जगतः', 'येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' इत्यादिवाक्यगतनारायणप्रत्यभिज्ञापकाः । अत्रेशशब्दश्च न रूढ्या प्रयुक्तः; अपितु गुणयोगात् । **'अनीशश्चात्मा'**, **'ज्ञाज्ञौ द्वावजावीशनीशौ'**, **'ईशः सर्वस्य'** इति निर्देशस्य सप्रतिसंबन्धितया अवयव (वार्थः) विवक्षाज्ञापकत्वात् । **अनन्तश्चात्मा विश्वरूपो ह्यकर्ता** इत्यत्रानन्तशब्दो योगरूढः । रूढ्यविवक्षानिमित्तसप्रतियोगिकनिर्देशाभावात् ।

तृतीये च खण्डे, **य एतद्विदुरमृतास्ते भवन्तीत्यनेन**, 'अम्भस्यपारे' इत्यनुवाकः प्रत्यभिज्ञाप्यते । स हि परमपुरुषविषयः । एवमुपक्रमो भगवत्परः । **एको हि रुद्र इत्यस्यानन्तरम्**, **विश्वतश्चक्षुरुत विश्वतोमुख** इति मन्त्रश्च भगवत्प्रत्यभिज्ञापकः । तस्य विद्युद्वर्णपुरुषविषयत्वात् । **द्यावाभूमी जनयन् देव** एकः इति च, 'शीर्ष्णो द्यौः समवर्तत, पद्भ्यां भूमिः' इत्यस्य प्रत्यभिज्ञापकम् । **यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः । हिरण्यगर्भं जनयामास पूर्वम्** इत्येतत्तु यच्छब्दयोगादनुवादरूपतया प्रमाणान्तरसापेक्षतया दुर्बलम् । इदं रुद्रस्य बह्वृचशतपथब्राह्मणावगतहिरण्यगर्भजन्यत्व-

विरोधि हिरण्यगर्भजनकत्व न प्रतिपादयितुं प्रभवति । बह्वृचे, 'तद्विदास भुवनेषु ज्येष्ठ यतो जज्ञे उग्रस्त्वेष नृम्ण । सद्यो जज्ञानो निरिणाति शत्रून्' इति हिरण्यगर्भसृष्टत्वं रुद्रशब्दरूढार्थस्य प्रतिपाद्यते । सुबालोपनिषदि, 'ललाटात् क्रोधजो रुद्र ' इति नारायणादुत्पन्नत्वं प्रतीयते ; महोपनिषदि, 'सोऽन्य कामं मनसा ध्यायीत । त्र्यक्ष शूलपाणि. पुरुषोऽजायत' इति । नारायणोपनिषदि, 'नारायणाद्रुद्रो जायते' इति । बृहदारण्यके, 'ब्रह्म वा इदम्' इति ब्रह्म प्रस्तुत्य, 'इन्द्रो वरुण सोमो रुद्र पर्जन्य ' इतीन्द्रादितुल्यतया रुद्रस्यापि ब्रह्मण सकाशादुत्पत्ति प्रतिपाद्यते । शतपथे अष्टमूर्तिब्राह्मणे, 'भूताना च प्रजापति सवत्सरमुषसि रेतोऽसिञ्चत् । सवत्सरे कुमारोऽजायत । सोऽरोदीत् । तं प्रजापतिरब्रवीत्, कुमार ! किं रोदिषीति । सोऽब्रवीत्, अनपहतपाप्मा वा अहमस्मीति अनाहितनामा , नाम मे धेहि पाप्मनोऽपहत्या इति । त पुन प्रजापतिरब्रवीत्, रुद्रोऽसीति' इत्यादिना रुद्रस्य रुतु दुःखजन्यत्वम् अनपहतपाप्मत्वादिकमावेद्यते । तथा शैलाख्यिब्रह्मणे चतुर्मुखसृष्टत्व रुद्रस्य प्रतिपाद्यते । भारते च 'विरूपाक्षाय दन्ताञ्जये (दन्ताञ्जलये) ब्रह्मण पुत्राय' इति ब्रह्मण पुत्रत्व प्रतीयते । सोऽब्रवीत् , वर वृणे । अहमेव पशूनामधिपतिरसानीति । तस्माद्रुद्र पशूनामधिपति ' इति वरदानलब्धपशुपतिभाव श्रूयते, 'विष्णोरैषम्य' प्रभृषे हविर्भि । विदे हि रुद्रो रुद्रियं महत्त्वम्' (गी. स र)इति विष्ण्वाराधनलब्धमहिमत्व रुद्रस्य श्रूयते । अतो हिरण्यगर्भजन्यत्वेन नारायण

1 एपस्येत्यादेरर्थ· गीतार्थसंग्रहरक्षा–श्रुतप्र-टिप्पणादौ द्रष्टव्य: ।

जन्यत्वेन च अनपहतपाप्मत्वेन कर्माधीनैश्वर्यवत्त्वेन च श्रुतस्य रुद्रस्य तद्विरुद्धहिरण्यगर्भजनकत्वस्य अवताररूपोत्पत्तिरिति विरोधपरिहारस्य वा असम्भवात् । कल्पभेदेन एकस्यैव रुद्रस्य हिरण्यगर्भरूपात् स्वस्मादु त्पत्ति, कल्पान्तरे रुद्ररूपात् तस्मात् हिरण्यगर्भरूपनयोत्पत्तिरिति कल्पन स्यापि, कार्यत्वेन कर्मवश्यत्वेन [च ?] प्रतिपादिते तस्मिन् असम्भवात्। इन्द्रादीनामपि तथात्वापाताच्च । तस्य विश्वाधिकत्वरूपविशेषणा सम्भवाच्च । ततश्च रुद्रशब्दस्य कार्यरुद्रव्यतिरिक्तविषयत्वे सति, अस्य वाक्यस्यानुवादरूपतया, 'नारायणाद् ब्रह्मा जायते' इत्यादियोग्यार्थ प्रापकवाक्यानुगुण्येन भगवत्परत्वनिश्चय । 'रुद्रस्य हिरण्यगर्भजन कत्वाभावेन रूढ्यर्थत्यागे स्वीकार्ये हिरण्यगर्भशब्दस्य रूढिं परित्यज्य स्कन्दपरत्वमाश्रीयताम् । प्रसिद्धस्य रुद्रस्य स्कन्दजनकत्वसम्भवात्' इत्यपि शङ्का निरस्ता, विश्वाधिकत्वादिविशेषणाना रुद्रे असम्भवात् । अतो रुद्रशब्दो भगवत्पर , 'रुद्रो बहुशिरा ' इति सहस्रनामपाठात् ।

या ते रुद्र शिवा तनूरित्यस्यानन्तरम्, ततः पर ब्रह्म पर बृहन्तमिति वाक्यम्, 'नारायण पर ब्रह्मे'ति महोपनिषत्वत्यभि ज्ञापकम् । ईश न ज्ञात्वा अमृता भवन्तीत्यत्र ईशशब्द यौगिक । वैरूप्यायोगात् । 'वेदाहम्' इत्यनन्तरवाक्यस्थैतच्छब्दः पूर्वरुद्रशब्द वाच्यस्य महापुरुषत्वमवगमयति प्रकृतपरामर्शित्वात् । ततो यदुत्त रतरमिति वाक्यमपि, "परमत सेतून्मान " इत्यत्रोपपादितरीत्या

विरोधपरिहारस्य वा असम्भवादित्यादिक 'न प्रतिपादयितु प्रभवति' इति प्रागुक्त प्रति हेतु । मध्ये बह्वृचे इत्यारभ्य, 'श्रूयते । अत ' इत्यन्तेन तत्र हेतुरुक्त । बह्वृचादौ पठमेवश्रवणादिति तदर्थ ।

महाविसंहारपरम् । सर्वाननशिरोग्रीवत्वञ्च पुंसूक्तार्थस्मारकम् । सर्वव्यापिपदं तु, 'व्याप्य नारायणः' इत्येतत् स्मारयति । भगवच्छब्दस्तु, 'भगवान् पवित्रं वासुदेवः पवित्रम्', 'परं पवित्रं भगवान् वासुदेवः', 'ये भगवन्तं वासुदेवमेव विदुः' इति वासुदेवासाधारणः । अत एव हि स्मर्यते, 'एवमेष महाशब्दो मैत्रेय भगवानिति । परमब्रह्मभूतस्य वासुदेवस्य नान्यगः' इति । सत्त्वस्यैव प्रवर्तकः इति सत्त्वप्रवर्तकत्वञ्च भगवत इति सिद्धम् ; 'यो ह खलु वा अस्य सात्त्विकोंऽशः सोऽसौ ब्रह्मचारिणः योऽयं विष्णुः' इति मैत्रायणीयश्रुतेः । अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मेति अन्तरात्मत्वञ्च सुबालोपनिषत्प्रत्यभिज्ञापकम् । हृदा मनीषेति तु विद्युद्वर्णपुरुषस्मारकम् । अनन्तरम्, सहस्रशीर्षेत्यादिपुरुषसूक्तमन्त्रद्वयमधीतम् । सर्वस्य प्रभुमीशानमित्येतत् नपुंसकत्वात् यौगिकमेव । न तु रूढम् ; पुल्लिङ्गनामसन्नात । सर्वस्य शरणं सुहृत् इत्येतत्तु, 'निवासः शरणं सुहृद् गतिर्नारायणः' इति श्रुतिप्रत्यभिज्ञापकम् । तमाहुरग्र्यं पुरुषं महान्तमिति महापुरुष एव स्पष्टमुक्तः । धातुप्रसादमपि महापुरुषशब्देनैकार्थयति अणोरणीयानिति मन्त्रे ।

चतुर्थे च खण्डे, 'द्वा सुपर्णा' इत्यादिवाक्यद्वयम् मुण्डकोपनिषत्कार्थ्यात् परमपुरुषपरम् । अत्र मायिनं तु महेश्वरमित्यत्र महेश्वरशब्दो नारायणैकपरः । 'सर्वलोकमहेश्वरम्', 'क्षीरोदन्वोदरे [illegible]' इत्यादौ, '[illegible] महेश्वर [illegible]' इति [illegible] महेश्वरशब्दो भगवति प्रयुक्तः । येनेदं [illegible] इति सर्वमिति [illegible] सर्वमिदं [illegible] तमीशानं वरदं [illegible] । [illegible]

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मेति पुरुषस्योक्तत्वात् । तत्र च, ईशानो भूतभव्यस्येति श्रुत्यन्तरप्रसिद्धेशानशब्दस्य प्रतिसंबन्ध्यभिधानेन रूढिविरहावगमात् भूतभव्यशब्दनिर्दिष्टस्यैवेह सर्वशब्दप्रतिपन्नत्वाच्च तद्वदेव रूढिविरह सिद्धः । य ईशेऽस्य द्विपदश्चतुष्पदः त(क ?)स्मै देवाय हविषा विधेम' इत्यत्र, 'हिरण्यगर्भ' इत्यादर्चतुष्टयविषयत्वं प्रतीयते । तच्च भगवत्परमित्युपपादितम् । एवं भगवत्परानेकोपनिषदैकार्थ्यप्रतीते, ज्ञात्वा शिवम्, शिव एव केवलः इति शिवशब्दद्वयं तत्परम् । एवं मुहुरभ्यस्यमानस्यापि शिवशब्दस्य, 'आकाशं प्रत्यस्तं यन्ति, आकाशो ह्येवैभ्यो ज्यायान्' इत्यत्र अभ्यस्ताकाश [शब्द ?] स्येव रूढार्थत्याग उपपन्नः । किञ्च सर्वव्यापी च भगवान् तस्मात् सर्वगतः शिवः इत्ययं शिवशब्द प्राकरणिकशिवशब्दानां माङ्गल्यपरत्वमेव सूचयति । सर्वगतत्वेऽपि भगवच्छब्दवाच्यत्वात् निर्दोष इति हि तस्य वाक्यस्यार्थ । अन्यथा सर्वव्यापिसर्वगतपदयोः पुनरुक्तिप्रसङ्गात । तदक्षरं तत् सवितुर्वरेण्यम् इत्यनेन 'अक्षरं प्रभुम्', 'तत् सवितुर्वरेण्य ध्रुवमचलममृतं विष्णुसंज्ञं सर्वाधारं धाम' इतिश्रुतिद्वयैकार्थ्यमवगम्यते । हृदा मनीषेति वाक्यम्, नैनमूर्ध्वं न तिर्यञ्चमिति मन्त्रद्वयमध्यगतवाक्यस्थशिवशब्दस्य परमपुरुषविषयता गमयति । तद्धि सर्वं रुद्रान्तर्यामिविशुद्धवर्णपुरुषविषयम् । अतः, 'मा नस्तोक' इति मन्त्रस्थरुद्रशब्दोऽप्यवयवशक्त्या अपर्यवसानवृत्त्या वा भगवद्विषय.।

[अत. ?] पञ्चमखण्डे, 'भावाभावकर शिव'मिति शिवशब्दो व्याख्यातः ।

षष्ठे च—**यः कालकालः** इति कालस्यापि परिच्छेदक काल उक्त । नायमन्तक । **भगेशमित्यनेनापि** भगवच्छब्दवाच्यानामैश्वर्यादीना षण्णामीश्वरत्वमेव प्रतीयते । ऐश्वर्यनिरङ्कुशत्वमेवोक्तम्, **तमीश्वराणां परम महेश्वरमिति** । ईश्वराणामिति प्रतिसम्बन्धिनिर्देशात् महेश्वरपदे रूढिर्न शक्यशङ्का । **देवतानां परम च दैवतमित्यन**न्तरनिर्देशवत् । तद्धि वाक्य देवतापारम्यपरम् । तत्र च **दैवतपति शब्दो न** क्वचित् देवताविशेषे रूढो । तत्स्थानीयश्च महेश्वरशब्द । अतो न रूढ्युन्मेष । **न तत्समश्च, पराऽस्य शक्तिरित्यादिभिश्च** तत्पारम्योपपादनम् । 'एको देव', 'एको नारायण' *इत्यनेनैका*र्थ्यात् । **न तत्र सूर्यो भातीति** मन्त्रश्च कठवल्लयधीतत्वात् विष्णौ प्रत्यभिज्ञापक । **नान्यः पन्था** इति पुसूक्त स्मारयति । ईशादि शब्दाना यौगिकत्वम्, ईशानत्वस्य निरुपाधिकत्वञ्च दर्शयति स **ईशोऽस्येति । 'यो ब्रह्माण विदधाति पूर्वम्, शरण प्रपद्ये, अमृतस्य पर सेतुमिति** निर्देशाश्च नारायणत्वसाधका । **य** इत्यनुवादरूपत्वात्, ब्रह्मणो भगवन्नाभिसम्भव [त्व] स्य प्रमाणप्रतिपन्नत्वात्, 'निवास शरण सुहृत्' इति श्रुते, 'अमृतस्यैष सेतु' इति मुण्डके श्रवणात् । **यदा** चर्मवदिति वाक्यम् उपायान्तराभावपरम्, **नान्यः पन्था** इत्युक्तार्थविवरणरूपम् ।

बृहदारण्यकान्ताना वेदान्ताना परिष्कृतिम् ।
विधायैव सभाष्याणा दशानामथ तत्समम् ॥
श्वेताश्वतरमुख्येषु ये श्रीभाष्याद्युदाहृता ।
आरब्ध कृतभाष्याश्च प्राच्यैस्तेषामपि क्रमात् ॥

नीलः	401	युजेवां	370
नीहार	374	युञ्जते	370
नैनं	415	युञ्जानः	368
नैवस्त्री	423	येनावृतं	427
पञ्चस्रोतो	354	यो देवानां	383, 411, 412
पुरुषएवे	395	यो देवो	380
पृथ्व्यप्तेजो	374	यो ब्रह्माणं	436
प्राणान्	372	यो योनिं	411, 419
भावग्राह्य	425	लघुत्व	375
महान्	393	वह्नेर्यथा	366
मानस्तोके	417	वालाग्र	423
मायां	410	विश्वतः	383
य एको	380	वेदान्ते	437
य एको	400	वेदाहमेतं	356, 3 9
यश्च स	420	स एव	413
यथैव	375	संकल्पन	424
यदाचर्म	437	संयुक्त	358
यदातमः	414	सतन्मयो	435
यदातम	376	समाने	407
यस्तन्तु	432	समे	373
यस्मात्	388	सर्वतः	396
यस्य देवे	438	सर्वव्या	367
यातेरुद्र	385	सर्वाजीवे	355
यामिषु	385	सर्वादिश	420
युक्तेन	369	सर्वानन	391
युक्त्वाय	369	सर्वेन्द्रिय	397

सविता 37।　सूक्ष्माणि 412
सविश्व 435　स्थूलानि 425
सवृक्ष 430　स्वभाव 426
सहस्र 3।5

श्रीः

श्वेताश्वतरोपनिषद्विषयसूची

कारणब्रह्मस्वरूपादिप्रश्नः 345
कालस्वभावादिकारणत्वविमर्शः 48
परिष्कारे तद्विवेचनम् 349
देवशक्तिनिर्धारणम् 351-354
जीवपरपार्थक्यम् 35६-359
तत्त्वहितादिविवेकः 360-367
योगार्थदेशकालादि 368-373
योगसिद्धिनिष्पत्त्यादि 374-380
भगवत एकस्यैव मोक्षप्रदत्वम् 380-381
भगवतो मोक्षहेतुबुद्धिप्रदत्वम् 382-384
ध्येयदेवतातत्त्वम् 386-387
नित्यनिरामयविग्रह 388-392
मोक्षधीहेतुसत्त्वप्रदत्वम् 393
हृदयकुहरे निविष्टत्वम् 394
पुरुषसूक्तप्रसिद्धपरमपुरुषत्वम् 395
जीवविलक्षणत्वम् 397-399
अभेदव्यवहारनिर्वाहकत्वम् 400
अजामन्त्रार्थविचारः 401-404
चमसाधिकरणम् 404
जीवब्रह्मवैलक्षण्यम् 407
मायामायितत्त्वम् 409-410
तत्त्वबुद्धिप्रार्थना 411
सर्वकर्माराध्यत्वादि 413
सर्वातिशायित्वम् 418
सर्वदेवोपास्यत्वम् 420
जीवाणुत्वम् 421-423
जीवस्यास्त्रीपुरुषादिता 423
कालस्वभावादिसर्वकारणप्रेरकत्वम् 426
शक्तिज्ञानाद्यतिशयः 431
सर्वचेतनानुग्राहित्वम् 432
चतुर्मुखस्रष्टृत्वादि 436
उपदेशोपसंहारः 437
गुरुभक्तेरावश्यकत्वम् 437

पराधिकरणम् 439
श्वेताश्वतरोपनिषदः श्रीपत्येकपरत्वं व्यासार्यवर्णितम् 442-447

शारीरके श्वेताश्वतराद्युपनिषद्वाक्यस्थलसूची

श्वे	शा.	श्वे	शा.
१—६.	४-१-३.	५—८, ९.	२-३-२१.
२—१०.	४-१-११.	४—१०; ६-१९.	१-४-२३.
३—९, १०.	३-२-७.	३—३५; ५—८.	१-३-२३.
४—५.	१-४-८.		

ऋष्यादिनाम

श्वेताश्वतरः अत्याश्रमिणः ऋषिसंघः 437

श्वेताश्वतरोपनिषदर्थसंग्रहकारिकाः

१. बृहदारण्यकान्तासु गतास्त्रीशादिषु क्रमात् ।
श्वेताश्वतरमन्त्रोपनिषदेकादशी स्थिता ॥

२. भोक्तृभोग्यात्मचिदचिदन्तरात्मैव कारणम् ।
अष्टाङ्गयोगतो जीवं समीक्ष्यैष निरीक्ष्यते ॥

३. एकोऽसौ भगवान् मुक्तेः पन्था जन्मलयादिकृत् ।
अकारार्थोऽयमग्न्यादिदेवतादिजगन्मयः ॥

४. कर्माहिपरतन्त्राणुजीवतत्त्वविलक्षणः ।
ब्रह्मादिकृत् प्रपत्त्येकवश्यो विश्वफलप्रदः ॥

५. श्वेताश्वतरखण्डानां षट्केनेत्थं समीक्षितः ।
शिवरुद्रादिशब्दोक्त्या भगवान् पुरुषोत्तमः ॥

शुभमस्तु

—:**:—